

नं. ११६१२ क

२१९ पत्राणि

ॐ श्रीगणेशाय नमः

१

आकाशपंचांकमृगाङ्कवत्सरे श्रीविक्रमार्कस्य शके सिते ऽश्विने
उपासनाचौकितपद्धतेः शुभे श्रीरामसिंहस्य महीभुजः प्रभा
यालालनाड्ककविनाविचार्य विनिर्मिता पद्धतिशुक्तिकायाः
तत्वीस्वरस्मां विषयानुदर्शिनी [illegible] तेः फलायच ॥

3

तं॰ रा॰
पत्रे ७७

१६ नित्यानांकवचं

समस्तापद्विमुक्त्यर्थं सर्वसंपदवाप्तये भूतप्रेतपिशाचादिपीडाप्रशान्तये सुखावाप्तये १ समस्तरोग
नाशाय समरे विजयाय च चौरसिंहगजव्याघ्रगवयादिभयानके २ अरण्ये शैलगहने मार्गे डिम्बे तु
के तथा सलिलाग्निमरुत्पीडा स्वयंपोतादिसंकटे ३ प्रजप्य नित्याकवचं सकृत्सर्वं तरत्यसौ सुखीजी
वति निर्द्वन्द्वो निःसपत्नो जितेन्द्रियः ४ शृणु तत्कवचं देवि वक्ष्ये तव यथातथम् येनाहमपि पुरा सुरे
वासुरजयी सदा ५ सर्वतः सर्वदात्मानं ललिता पातु सर्वगा कामेशी पुरतः पातु भगमालात्वनंतरा ५
दिशं पातु तथा दक्षपार्श्वं मे पातु सर्वदा नित्यक्लिन्नाथ भेरुण्डा दिशं पातु सदा मम ६ तथैव पश्चिमं भागं रक्षे
त्सा वह्निवासिनी महावज्रेश्वरी रक्षेदनंतरदिशं सदा ७ वामपार्श्वं सदा पातु इतीमे त्वरिता ततः पालयेत्तु
दिशं चान्यां रक्षेन्मां कुलसुंदरी ८ नित्या मामूर्ध्वतः पातु साधो मे पातु सर्वदा नित्या नीलपताकाख्या विज
या सर्वतश्च मां ९ करोतु मे मंगलानि सर्वदा सर्वमंगला देहेन्द्रियमनःप्राणाञ्ज्वालामालिनि विग्रहा १०
पालयेदनिशं चित्रा चित्तं मे पातु सर्वदा कामात्क्रोधात्तथा लोभान्मोहान्मानान्मदादपि ११ पापान्मत्सरतः शो
कात्संशयात्सर्वतस्तथा स्तौमित्याच्च समुद्योगादशुभेऽप्रुत कर्मतः १२ असत्यात्क्रूरचिन्तातो हिंसातश्चौ
रतस्तथा रक्षंतु मां सर्वदा ताः कुर्वन्त्विच्छाम्शुभे शुभे १३ नित्याः षोडश मां पांतु गजारूढाः स्वशक्तिभिः
तथा हयसमारूढाः पांतु मां सर्वतः सदा १४ सिंहारूढास्तथा पांतु मां तरक्षुगता अपि भूतगाः सर्वदा पांतु
सर्वतः सर्वदा रणे १५ तार्क्ष्यारूढाश्च मां पांतु चापि व्योमगतास्तथा भूतप्रेतपिशाचापस्मारकृत्यादिकान्गु
हान् १६ द्रावयंतु स्वशक्तीनां भूषणैरायुधैर्मम गजाश्वद्वीपिपंचास्यतार्क्ष्यारूढाखिलायुधाः १७ असंख्या
शक्तयो देव्यः पांतु मां सर्वदा सदा सायं प्रातर्जपेन्नित्याकवचं सर्वरक्षकं कदाचिन्नाशुभं पश्येत्सर्वदानंदमास्थि
तिचमस्सुमः ॥ इति तंत्रराजे नित्याकवचं समाप्तं ॥

8

4

प॰
१

ॐश्रीगुरवेसरस्वतीरूपायनमः ॐस्वस्तिश्रीगणेशायन
मः श्रीदेव्यैसदासुफलदायिन्यैनमः ॐनमोभगवतेशि
वमूर्तयेनमः श्रीदेव्युवाच ॐभगव न्सर्व वेत्तात्वं ज
गता मुपकारकः देवादि देवदेवेश त्रैलोक्या भयदाय
क शाक्वरा सुरसंग्रामे मह्यंदत्तो वरस्त्वया तदद्य कृपया
शंभो संप्रदातुं त्वमोभव श्रीभैरवउवाच देवि मत्तो वरो
दत्तो देवदानव संगरे यत्ते मनस्य भीष्टंतु तत्वं वरयस्व
व्रते ३ श्रीदेव्युवाच भगव न्सर्वधर्मज्ञ सकला गम पार
ग देवदेवी महादेवी महात्रिपुर सुंदरी ४ त्रिकूटा घो

इषी देवी श्रीविद्या ब्रह्म रूपिणी तस्याः पंचांग मखिलं
सारात्सारो नमोनमः ५ वदश्रीचं महादेव यद्यहं प्रेयसी
तव श्रीभैरवउवाच लक्षवारं सहस्राणि वारितासि पुनः
पुनः स्त्रीस्वभावान्म महादेवि पुनस्त्वं परिपृच्छसि श्रृणु
हे कृपयादेवि तवप्रीत्या महेश्वरि महात्रिपुर सुंदर्याः
पंचांगंते ब्रवीम्यहं श्रीविद्या त्रिपुरादेवी जगच्चैतन्य रूपि
णी त्रिकूटा षोडशीविद्या महा श्रीषोडशाक्षरी ६ यादेव
देवी जगतां सृष्टिस्थित्यंतकारिणी सामहा षोडशीविद्या
महात्रिपुरसुंदरी ७ राज्यंदेयं शिरोदेयं देयासंततिरर्थि

ने वरुहर्णे महंदेयं नदेया षोडशाक्षरी ११ गोप्यांगोप्य न
प. मोविद्यां शुभांच शारजन्मनः शुहाति गोप्यां गोप्तव्यां साथ
२ काग्रे नगोपयेत् १२ त्रिपुरेशी महाविद्या प्रभाव सहिता
कलौ सर्वस्या त्रुपिणीविद्या बाला प्रवति प्रौढिकाः १३
अक्षरी त्रिपुरा बाला युवा पंचदशाक्षरी प्रौढा त्रिकूटा
श्रीविद्या महाश्री षोडशाक्षरी १४ महाश्री षोडशाक्षर्याः
पंचांगं वक्ष्यामादरं महाश्री षोडशाक्षयी मंत्रोद्धारं ब्रवी
म्यहं १५ यत्रोद्धारं तथाध्याने प्रयोगा नहवक्ष्यहं यथा ॥
लक्ष्मीःपरामदनवाग्भव शक्तियुक्ता तारंचभूतिकमला

कथितापिविद्या शक्तादिकंतु विपरीततयाचप्रोक्तं श्रीषो
डशाक्षरविधिः शुभदोरक्तहर्पणीः इतिमंत्रोद्धारः श्रस्याःश्री
षोडशाक्षर्यां अन्यदोषो नविद्यते मंत्रोत्कीलन दोषोवा मं
त्रसंजीवन स्यच संपुटस्याविनादेवि पुरश्चरण कर्मणा
गुरुहस्तेनवादेवि साधकस्य करेणवा पुरश्चर्यां प्रकुर्वी
त वर्णालक्षं जपावधि नकदाचित्तु कुर्वीत स्वहस्तेनच सा
धकः नतिथिर्नचनक्षत्रं नोगन्यासश्चमंत्रिणाम् नवार
दोषो नोविघ्नो नशौचंनियमोनच साक्षादसृतरूपायं मं
त्रःश्रीषोडशाक्षरः ऋषिःस्या दक्षिणामूर्तिः पंक्तिश्छंद

पं॰ ३

उद्दोस्यते देवताच मयाप्रोक्ता महात्रिपुरसुंदरी लक्ष्मीवी
जं पराशक्तिः कामराजस्तु कीलकं चतुर्वर्गेषुविद्याया वि
नियोगःप्रकीर्तितः यंत्रोद्धारंप्रवक्ष्यामि सर्वाशापरिपूर
कं सर्वसंमोहनंयंत्रं सर्वसिद्धिप्रदायकं अथयंत्रोद्धारः
विंदुत्रिकोणवसुकोणदशारयुग्म मन्वस्त्रनागदल संग
तषोडशारम् हत्तत्रयंचधरणीसदनत्रयंच श्रीचक्रराज
उदितःपरदेवतायाः इति अथध्यानंप्रवक्ष्यामि सर्वतंत्रेषु
गोपितं सारंत्रिपुरसुंदर्याः सर्वस्वममपार्वति येनध्याने
नसकलंजगत्संमोहितंकृतम् यस्मिन्देवेशिब्रह्मांडे क

दाहांतेविलीयते उन्नमद्धेमरुचिरांरविचंद्रवह्नि नेत्रांधनुः
शरयुतांऽकुशकामपाशान् रम्यैर्भुजैर्दधतींशिवशा
क्तिरूपां कामेश्वरींहृदिभजामिधृतेंदुलेखां इतिध्याने य
नेनध्यानमात्रेण ब्रह्मविष्णुहरःशिवे ब्रह्मादयःस्वरग
णा ज्ञानानिसिद्धचक्रगः कथयाम्यथदेवेशि स्तंभनादिवि
धिंपरं येनविधायमहेशानि साधकोयोगवान्भवेत् स्तंभनं
मोहनंचैव मारणाकर्षणेतथा वशीकारोच्चाटनकौ शां
तिकंपौष्टिकंतथा सांतानिकंमौक्तिकंच प्रयोगादशकी
र्तिताः स्तंभनंरविवारेतु स्नात्वाजप्त्वामंत्रंशिवे यमुद्दा

पं
४

येभवेन्नृणां स्तंभनंत्वरितेकलौ तारंरमांपरांतारं कूटत्रय
मुदीरयेत् तारंपरांरमांतारं फट्स्तंभनकरोस्त्ययं प्रकाशः
ॐश्रींह्रींॐकएईलह्रींहसकहलह्रींसकलह्रींॐह्रींश्रींॐ
फट् ॥ गतेःसूर्यस्यचंद्रस्य वह्निवातादिपाथसां रिपुसैन्या
रिदस्तूनां स्तंभनंजायतेध्रुवं इतिस्तंभनं रवौस्नात्वानदी
तीरे जपेल्लक्षंमहेश्वरि यस्योच्चारणमात्रेण मोहमेष्यंति
भैरवि॥ तारंकामःशारदातारं कूटत्रयमतःपरं शारदाकामंप्र
नमतारं फट्मोहनमंत्रः स्मृतः प्रकाशः ॐक्लींसौःॐकए
ईलह्रींहसकहलह्रींसकलह्रींसौःक्लींॐफट् देवानांच

नरेषणानां स्त्रीणामप्सरसांतथा सद्योदर्शनमात्रेण मोह
नेजायतेध्रुवं इतिमोहनं रवौश्मशानेमंत्रस्य जपंकृत्वा
महेश्वरि आनीयभस्ममुष्टिंच क्षिपेच्छत्रुगृहेपथि समा
हान्म्रियतेशत्रुः साधकस्यनसंशयः नारंकालींवह्निर्वं
चत्रिकूटापदमुच्चरेत् कूर्चंकालींतथानारंफट्मारणम
नुःस्मृतः ॐक्रींहूंकएईलह्रींहसकहलह्रींसकलह्रींहूं
क्रींॐफट् ११ तपोवान्दपमस्त्रोवाविप्रोवाक्षत्रियोपिवा
शत्रुःकालसमानोपि स्मृमेच्छान्तिभैरवि १२ रवौमंत्रजप
स्सात: कामीसाधकसत्तमः रंभाद्यप्सरसांदेवि भवेदा

प॰ ५

5

कर्षणंतथा तारंमारंवाग्भवंचकूटत्रयमुदीरयेत् वंदंमा
रंतथातारं फडाकर्षिमनुःस्मृतः ओंह्स्क्लींऐंकएईलह्रींह
सकहलह्रींसकलह्रींऐंक्लींओंफट् प्रकाशः अस्योच्चारण
मात्रेण सहसाकर्षणंभवेत् रंभास्वर्गस्थितावापि शनैः
शाडर्भविष्यति रवौमध्याह्नसमये स्नात्वामूलंजपेच्छिवे
जन्माशीघ्रंवशंयाति त्रैलोक्यंसचराचरं तारंपरांस्मरंता
रं कूटत्रयंमहेश्वरि तारंस्मरंपरांतारं फट्वशीकारकः
स्मृतः ओंह्रींक्लींओंकएईलह्रींहसकहलह्रींसकलह्रींओं
क्लींह्रींओंफट् अस्योच्चारणमात्रेण देवाश्चापिमहेश्वरि स

यःकिंकरतांयाति किंपुनःक्षुद्रभूमिपाः इतिवशीकरणे
रवौगत्वाश्मशानेतु जपेन्मंत्रंमहेश्वरि यज्जपेनभवेच्छ
त्रो ह्युच्चाटनमरिंदमे तारंहृज्जेशरत्कामः कूटत्रितयमु
च्चरेत् कामःशक्तिस्तनेतारं फडुच्चाटनकेस्मृतः ॐजंसौः
क्लींकएईलह्रींहसकहलह्रींसकलह्रींक्लींसौःजंॐफट्
दशवारप्रजप्तेन मंत्रेणपरमेश्वरि रिपुरुच्चाटयेद्देविसा
र्वभौममपिप्रिये इत्युच्चाटने रवौजपेन्मन्त्रंदेवि दशवारं
यथाविधि त्रिवारंसर्वरोगाणां सद्यःशान्तिर्भविष्यति ता
रंशरत्परांकामं कूटत्रयं समुच्चरेत् कामःपराशरत्तारं

पं०
९
6

फट् शांतिककरः स्मृतः ॐ सौः ह्रीं क्लीं कएईलह्रीं हसकह
लह्रीं सकलह्रीं क्लीं ह्रीं सौः ॐ फट् रोगाणामतिहृष्टीनां ग्र
हाणां सर्ववेदिते उपद्रवस्य सर्वस्य सद्यः शांतिर्भविष्यति
इति शांतिकं रवौ स्नात्वा जपेन्मूलं दशवारं महेश्वरि पि
पासां किं न दिव्याव्रे महापुष्टिः प्रजायते नारं मारं स्मरस्ता
रं हृट् त्रयं महेश्वरि नारं स्मरो मारतारो फट् पौष्टिक करः
स्मृतः ॐ क्लीं क्लीं ॐ कएईलह्रीं हसकहलह्रीं सकलह्रीं ॐ
क्लीं क्लीं ॐ फट् दुर्बलानां नराणां च पितॄणां च दिवौकसां
सकृदुच्चारमात्रेण महापुष्टिः प्रजायते इति पौष्टिकम्

रवीजपेन्मंत्रं देवि साधकोदेवनागरहे येनजप्तेनवेध्याया
भवेत्पुत्रोऽखयेश्वरः तारंशारक्षरतारं कूटत्रितयमुच्चरेत्
तारंशारक्षरस्तारं फट् चसांतानिकोमनुः प्रकाशं ॐसौःसौः
ॐकएईलह्रींहसकहलह्रींसकलह्रींॐसौःसौःॐफट् वं
ध्यायाःकाकवंध्याया स्तनपुत्राःसुरेश्वरि पुत्राभवंतिमूमी
शाः स्वकुलैकप्रधानकाः इतिसांतानिकं रवीप्रानजपेन्मं
त्रं तत्वरूपंमहेश्वरि यस्योच्चारणमात्रेण मौक्तिकंजाय
तेध्रुवं तारंरमारमातारं कूटत्रयमुदीरयेत् तारंरमारमा
तारं फट्मौक्तिककरोत्पयं ॐश्रींश्रींॐकएईलह्रींहस

पं ७

कह्लह्रीं सकलह्रीं ॐ श्रीं स्त्रीं ॐ फट् इति मौक्तिकं इदं हिम
म सर्वस्वं रहस्यं त्रिदिवौकसां गोप्यं गुह्यतमं देवि न प्रका
श्यं कदाचन इति दशप्रयोगाः अधुना देवि वक्ष्यामि पूजाप
टलमीश्वरि श्रीदेव्याः षोडशान्तर्याः पूजां मानसिकीं चरेत्
स्तेनकेम्लेनकेवापि पथि कान्तारमंडले म्लेछभूमौ चकारा
यां संकटे रणमंडले मनसैव चरेत्पूजां त्रिकूटायां महेश्व
रि शृणु त्वं भक्तिभावेन यथावद्दर्पितं मया अथाय शयना
देवि व्याहेदिव्यमुहूर्तके पद्मात्पमुखवह्नस्थां श्री नाचमया त्रि
महेश्वरि प्राणायामत्रयं कृत्वा गुरुं ध्यात्वा सशक्तिकं देवी

कामेश्वरांकोप विष्टाकामेश्वरींस्मरेत् ध्यात्वाहृदेवेण्यष
हृदीदैं न्यांसंकृत्वायथाविधिः जपेन्मूलंचगायत्रीं शुरवे
चसमर्पयेत् आगात्यवहिरोंकारं जपनारण्यक्ष्मिष्ठु तत्र
मूत्रादिसंत्यज्य वर्णाक्रेशौचमाचरेत् रमावीजेनसंशोध्य
दंतान्साधकसत्तमः मायावीजेनगंडूष त्रयंकुर्यान्महेश्वरि
मूलेनदेविनीर्थानि नदावाह्यस्वसिद्धये ॐगंगेचयमुने
चैव गोदावरिसरस्वति नर्मदेसिंधुकावेरि जलेस्मिन्सन्नि
धिंकुरु इत्यावाह्यमहादेवि देवीमावाहयेत्ततः मूलेनत्रिः
समुत्सृज्य तयंभस्मिमहेश्वरि ततोमूलंजपेन्मंत्री गाय

पं॰
८
8

ह्रींविविशेषतः सूर्यायार्घ्यत्रयंदद्या देवदेव्योस्तथैवच
ॐत्रिपुरेदेविविद्महे आदिकूटसमन्विते कामेश्वरिधी
महिच द्वितीयकूटभूषिते त्रितयकूटपूर्वंच ततःक्लिन्ना
प्रचोदयात् प्रकाशे कएईलह्रींत्रिपुरेदेविविद्महे हसकह
लह्रींकामेश्वरिधीमहि सकलह्रींततःक्लिन्नाप्रचोदयात्
२ जलादाकल्पवासांसि परिधाप्यचसाधकः संध्यांसमन
सांकृत्वा चाद्यमर्षणपूर्वकं संध्यानिर्वर्त्यदेवेशि यागगे
हंततोव्रजेत् ततोद्वारार्चनंकृत्वा ऊर्ध्वादासनशोधयने भू
तशुद्धिंततःकृत्वाप्राणार्पणविधिंततः षोडशान्यासमभोगे

न देहंदेवमयंचरेत् मनसावर्णभागोक्ते श्रीचक्रेतत्रभा
वयेत् बिंदुत्रिकोणवसुकोणदशारयुग्म मन्वस्रनागद
लसंगनेत्यादिशाग्रक्रम् विभाव्यतत्रश्रीचक्रे हृदयेसाय
कोत्तमः योगपीठंततोभ्यर्च्य हृत्तेयंरेलेवंइति विदैाका
मेश्वरींकोप विष्णोकामेश्वरींस्मरेत् पात्राणिस्थापयेत्तत्र
त्रिकोणेजलनिर्मिते चतुरस्रेमंडलेच विधायगंधकाद्युभिः
सामान्यार्घ्यंत्रिकूटाया मंडलेपूजयेच्छिवे चतुरस्रेमंडलेच
समभ्यर्च्यचरेत्ततः ॐअस्त्रायफडित्येवंसंस्थाप्यपात्रंत्रिपादि
कं तत्रास्त्रक्षालितंशंखं समभ्यर्च्यतथासुधीः तत्रार्कमंड

प॰ ५

9

ले देवि सोमवह्न्योश्च मंडले संपूज्य मूलमंत्रेण कलास्तेषां
समर्चयेत् मूलाष्टमंत्रितं देवि विधाय तीर्थवारिणा तेना
र्घ्यं शिवे शंखं शंखमुद्रां निवेद्य च तीर्थमावाह्य देवेशि
शुद्धेन तेनैव भावयेत् सामान्यार्घ्यस्य वामे तु शोभिते कलशे
शिवे त्र्यस्रं चैव षडस्रं च वृत्तं तत्पार्श्वमंडले पुष्पाक्षतैः सम
भ्यर्च्य तत्र कूटत्रयेण च षडंगन्यासभागेन समभ्यर्च्य षड
स्रकं चतुरस्रं तथाभ्यर्च्य संस्थाप्याथ त्रिपादिकां कलाः सू
र्येंदुवह्नीनां समभ्यर्च्य यथाविधि कलशेऽस्मिन्महादेवि दे
वीं संपूजयेत्ततः आनंदभैरवं चैव देवि कूटत्रयेण च मा

यारमाकामबीजे धेनुमुद्रांप्रदर्शयेत् मत्स्यमुद्रादिना

च्छाद्य सामान्यार्घ्यस्यदक्षिणे कलशार्हेमंडलेच विधा

यान्यंमहेश्वरि शक्तिपात्रेसमाधाय मूलेनाष्टाभिमंत्रि

ते तत्रैवपश्चेलक्ष्मीपात्रे तथावटुकपात्रके गुरुपात्रादिषु

पूर्वे तीर्थंशंखोदधोप्ययः पंक्त्याकारेणदेवेशि पात्रा

णिस्थापयेत्ततः पाद्यार्घ्यमधुपर्काचमनीयपात्रपूज

नं विधायतत्रश्रीदेव्या न्यासंषडंगपूर्वकं मणिपूरेवल

येथे मूलाधारादिकेशिवे शिवशक्त्योःसामरस्य विभा

व्यसमायकेश्वरः ततःकामकलारूप त्रिपुरीकृतविग्रहः

प॰ १०

10

शिवशक्त्योःपादुकांच तर्पयामिनमइति सम्यथादेविसं
तर्प्य ततःकूटत्रयेणच सर्वस्तनाद्यङ्कपायाः पूजनीया
श्चतर्पणैः संतर्पयेद्धृत्कलत्र द्विश्यौचादीन्महेश्वरि परा
शक्तिरूपाःपूज्यास्त्रीयोंवातामहेश्वरि तत्वत्रयेणवाच
म्याशिवएवभवेत्स्वयं श्रीचक्रेदेवदेवस्याश्च रूपंध्यात्वात्रिव
णकं स्थापनंसन्निधानंच संमुखीकरणंशिवे मुद्राभिः
साधकःकृत्वा देवीम्प्रत्यायमुद्रया देवैदेवायमूलेन प्रा
णान्दत्वामहेश्वरि शिवशक्त्योःपरंरूपं ध्यात्वापूजांसमा
चरेत् तदादौदेवदेवस्याश्च पाद्यार्घ्यादीन्निवेदयेत् प्रथम

ऐं निवेद्यानि निवेद्याचमनीयकं नानालंकारवस्त्राणि नि
वेद्य सायकोत्तमः नैवेद्याचमनीयादि शिवशक्त्योर्निवेद
येत् दीपधूपादिसंभाव्य परमान्नं निवेद्य च ताम्बूलं च मु
खेदत्वा स्वच्छन्त्वायाश्च तर्पयेत् पुष्पाञ्जलिं च श्रीचक्रे द
त्वा पूजां समाचरेत् आदौ कामेश्वरीं नित्यां पूजयेद्भगमा
लिनीं नित्यक्लिन्नां च संपूज्य भेरुण्डां च महेश्वरि श्रीवह्नि
वासिनीं नित्यां महाविद्येश्वरीं ततः शिवदूतीं महेशानि
त्वरितां पूजयेत्ततः श्रीकुलसुन्दरीं नित्यां नित्यां नित्यां त
तःपरं ततो नीलपताकां च विजयां च महेश्वरि श्रीसर्वम

प॰
११

गलांनित्यां ज्वालामालांततःपरं विचित्रांनित्यांमहेश्वानि त्रि
कोणेपूजयेच्छिवे पुनःपुष्पांजलिंदत्वा श्रीविद्यापूर्वभाग
योः गुरुपंक्तित्रयीपूज्या तर्पणीयापृथक्पृथक् गुरुपू
जांविधायाथ त्रिपुरांपूजयेत्ततः त्रिपुरांपूजयाम्यद्य त
र्पयामिनमइति तत्रादौपूजयेद्देवि ऐंक्लींसौःत्रिपुरेश्वरी
त्रिपुरसुंदरीदेवि ततस्त्रिपुरवासिनी त्रिपुराश्रीयजेन्म
श्री ऐंक्लींत्रिपुरमालिनी ह्रींश्रींसौःत्रिपुरासिद्धा पूजयेत्त्रि
पुरांविकां पूजयेन्मातृकामंत्रैःमहात्रिपुरसुंदरी इति
श्रीवत्सरस्वादि वैन्दवांतेषुपूजयेत् नवचक्रेषुदेवेशि

नवचक्रेश्वरीपुनः पूजनीयास्तुयोगिभ्यो वामावर्त्तेनपा
र्वति अणिमाद्यास्तथासिद्धीः पूजयेत्साधकोत्तमः ब्रा
ह्म्याद्यामातरः पूज्या दशवाहुपरमेश्वरि सर्वसंक्षोभिनी
मुद्रा नवमुद्राः प्रपूजयेत् ततोमूलेनश्रीविद्यां संतर्प्य
परमेश्वरी पुष्पांजलित्रयंश्रीचक्रे दत्वाष्टदलेर्चयेत्
सर्वाशापूरकायात्र श्रीचक्रायमहेश्वरि दद्यात्पुष्पांज
लिंदिव्यां ततःसंपूजयेच्छिवा ह्रींश्रींकामाकर्षिणीच
नित्याकलापदांचितां श्रंश्रांवुद्ध्याकर्षिणीच तथाहंका
रकार्षिणी ईंईंशब्दाकर्षिणीच तथाउंस्पर्शाकर्षिणी

प॰ ११ ॐ रूपाकर्षिणीनित्या ॐ रसाकर्षिणीनित्या ॐ गंधाकर्षि
णीनित्या लं चित्ताकर्षिणीनित्या लं धैर्याकर्षिणीनित्या
पं स्मृत्याकर्षिणीनित्या पं नामाकर्षिणीनित्या डं बीजाक
र्षिणीनित्या डं आत्माकर्षिणीनित्या श्रं अमृताकर्षिणीनित्या
श्रं शरीराकर्षिणीच षोडशारेषुपूजयेत् मूलदेवीमहा
देवि संतर्प्यमाथकोनमः सर्वसंक्षोभकेचक्रे दत्वापुष्पा
जलिंततः अनंगकुसुमादेवी अनंगमेखलेतिच अनंग
मदनादेवी अनंगमदनातुरा संपूज्यानंगरेखांच संपूज्या
नंगवेगिनी अनंगांकुशासंपूज्या संपूज्यानंगमालिनी

संपूज्याष्टदलेदेवि मूलदेवीं वितर्पयेत् शिवशक्तीसाधके
शः प्रणमेद्योनिमुद्रया इत्येतच्चक्रत्रितयं ध्यायेच्चैवस्वरू
पके सर्वसौभाग्यदायात्र श्रीचक्रायमहेश्वरि दत्वापुष्पां
जलिंमंत्री पूजयेत्साधकोत्तमः सर्वसंक्षोभिणीशक्तिः स
र्वविद्राविणीतथा श्रीसर्वाकर्षिणीशक्तिः सर्वाह्लादनका
रिणी सर्वसंमोहिनीशक्तिः सर्वस्तंभनकारिणी श्रीसर्व
जृंभिणीशक्तिः सर्ववशंकरीततः श्रीसर्वरंजनीशक्तिः
सर्वोन्मादनरूपिणी सर्वार्थसाधनीशक्तिः सर्वसंपत्तिपूरि
णी सर्वमंत्रमयीशक्तिः सर्वद्वंद्वक्षयंकरी संपूज्यासाधके

प० रेखा वामावर्त्तेनपार्वति कामेश्वरीचसंनध्य प्रणमेद्योनिमु
१३ द्रया सर्वार्थसाधकायाश्च चक्रायसाधकोनमः पुष्पांजलिंत
13 तोदद्या सजयेत्सिद्धिदेवताः सर्वसिद्धिप्रदादेवी सर्वसंपत्प्रदे
तथा सर्वप्रियंकरीदेवी सर्वमंगलकारिणी सर्वकामप्रदे
देवीसर्वदुःखविमोचिनी सर्वमृत्युप्रशमनीसर्वविघ्नविना
शिनी सर्वांगसुंदरीदेवी सर्वसौभाग्यदायिनी गंधाक्षतैः
समभ्यर्च्य तर्पयेत्सकलदेवता कामेश्वरीचदेवेशि प्रणमेद्यो
निमुद्रया सर्वरक्षाकरायाश्च चक्रायसर्ववंदिते दत्वापुष्पां
जलिंदेवि पूजयेत्साधकोनमः ह्रींश्रीसर्वज्ञतादेवीसर्वश

क्षिस्ततःपरं सर्वैश्वर्यप्रदादेवी सर्वज्ञानमयीततः ततःसे
प्सजनीयाच सर्वव्याधिविनाशिनी सर्वाधारस्वरूपाच स
र्वपापहराततः सर्वानंदमयीदेवी सर्वरक्षास्वरूपिणी
महादेविमहादेवी सर्वेप्सितफलप्रदा इतिगंधाद्यैः पू
ज्या मूलदेवीचतर्पयेत् संतर्प्यसाशिवांदेवी प्रणमेद्योनि
मुद्रया एतद्द्वितीयचक्रंत सूर्यरूपंस्मरेत्हृदि सर्वरोग
हरायात्र चक्रायनवरूपिणे दत्वापुष्पांजलिंदेवि पूजयेद्दे
वताष्टकं वशिनीवाग्देवताद्यै कामेश्वरीततःशिवे मोदि
नीवाग्देवताच विमलाप्यरुणाततः जयिनीवाग्देवताच

प॰ २४

14

पूज्या सर्वेश्वरी ततः कौलिनी वाग्देवता च पूज्यास्तास्तर्पया
म्यहं गंधाक्षतपुष्पनाद्यैर्मूलदेवीं च तर्पयेत् वाग्देवताष्ट
कं पूज्य प्रणमेद्योनिमुद्रया वाग्देवताष्टकं पूज्य रक्तपुष्पै
र्विशेषतः ॐ अंतरालचक्राय दत्वा पुष्पांजलिं ततः दक्षा
धोहस्तकमले देव्याः पश्चिमभागके जृंभणकामबाणा
श्च वामाधोहस्तभागके मोहनेकामयन्तुश्च दक्षिणेदेवि
तत्करे वशीकारेकामपाशं कामांकुशं च स्तंभने चतुष्क
रपद्मेषु पूजयेदायुधानि तु सर्वसिद्धिप्रदायात्र श्रीचक्रा
य महेश्वरि दत्वा पुष्पांजलिं पूजा मारभेत्सायकोन्नमः का

मेश्वरीवज्रेश्वरी पूजयेद्भगमालिनी कूटत्रयेण देवेशि
त्रिकोणं साधकोत्तमः इति संपूज्य संतर्प्य मूलेन मूलदेव
तां सर्वानंदमयायात्र श्रीचक्राय महाबिंदवे दद्यात्पुष्पाञ्ज
लिं देवि साधकः सर्वसिद्धये मूलविद्यां समुच्चार्य समवारं
महेश्वरि पूजयेत्साधको भक्त्या महात्रिपुरसुंदरी इति सं
पूज्य संतर्प्य गंधाक्षतप्रसूनकैः धूपदीपादिभिश्चैव नैवे
द्यैश्च मनोहरैः तथा श्रीचक्रायापि दद्याद्बलिमनुत्तमं द
त्वा देव्यै पुनर्देवि नैवेद्याचमनीयकं तांबूलछत्रचामरा
रात्रिकादीन्निवेदयेत् संक्षोभद्रावणाकर्षि वशोन्मादम

पं॰ १५

15

ह्रीं ऊं श्रां: खेचरीबीजयोर्म्माख्या नवमुद्राः प्रदर्शयेत् सौभा
ग्यबीजन्यासेन स्वदेहं व्यापयेच्छिवे देव्यग्रे वजपं कृत्वा पा
ठं कुर्यात्ततः परं वर्मसहस्रनाम्नां तु स्तोत्रराजस्य पार्वति
शिवशक्त्योर्महादेवि जपं तत्र समर्पयेत् गुह्यातिगुह्यगो
प्त्री त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु मे देवि त्वत्प्रसादान्म
हेश्वरि गणेशग्रहनक्षत्र योगिनी राशिरूपिणी ध्यात्वा न्या
सं च रेदेवि देवदेव्यौ विसर्जयेत् प्रातः प्रभृति सायान्तं साया
दिप्रातरं ततः यत्करोमि जगन्मातः स्तदस्तु तव पूजनं सं
हारमुद्रया देवि देवदेव्यौ विसृज्य च स्वयं सदाशिवो भूत्वा

शिवशक्तिःस्वरूपकः त्रैलोक्येसाधकोदेवि स्रवंचविहरे
दिति प्रयोगांश्चैववक्ष्येहं मन्त्रौपर्वतनंदिनि उपचारंब्रवी
म्यद्य नवाख्येचंडरात्मने स्तंभनंमोहनंचैव मारणाकर्ष
णंतथा वशीकारंतथोच्चाटं शांतिकंपौष्टिकंतथा एते
षांसाधनंवक्ष्ये जगतोहितकाम्यया अभक्तायनदातव्यं
नदुष्टेभ्यःकदाचन एवांगुप्यायशायना ज्ञत्वाप्रेतगर्हांति
के मूलंसाधकएवाशु जपेदयुतसंख्यया होमोजातीफलैः
पीतैः पुष्पैश्चहतनामिश्रकैः शत्रुसैन्यादिदस्मनो वादिनो
स्तंभनंभवेत् इतिस्तंभनम् होमेमध्याह्नसमये स्नात्वा

प॰ १८ कूपजलेनतु कूपांतिकेमंत्रंजप्त्वा साधकोयुतसंख्यया हो
मयेत्हुतामिश्रेच माहिषंदधिशार्करं भस्मनातिलकंकु
र्यां मोहयेद्भुवनत्रयं इतिमोहने भौमेर्धरात्रसमये चतु
17 ष्पथगतः सुधीः अयुतंतुजपेन्मूलं होमयेत्हुतपायसं
रक्तचंदनमिश्रेच स्त्रीकेशैश्चसमन्विते शत्रुः कालसमानो
पि मृत्युमेष्यतिनान्यथा इतिमारणे बुधेनिशावसानेतु
गत्वाशून्यालयेजपेत् अयुतंमूलमंत्रेण होमयेत्हुतशार्क
रं कर्णिकारसहस्राणि विल्वपक्वानिपार्वति रंभायश्चर
सोचापि भवेदाकर्षणंध्रुवं इत्याकर्षणम् ग्रैष्मस्योदयेगा

गत्वा नदीतीरं च साधकः मूलमंत्रेण महादेव्या जपेदयुतसं
ख्यया होमः सर्पिर्दधिक्षीर मल्लीकामालतीपुष्पैः श्रीफलैः
सहस्रादेवि वशयेद्भुवनत्रयं स्त्रीवशीकरणे शुक्रे निशा
मुखे गत्वा वटमूले जपेन्मंत्रं प्रयुतं साधको भक्त्या होमः
कार्यस्तु सर्पिषा दध्याद्यन्नादिमिश्रेण गोमत्रेण च पायसैः
शत्रोर्मत्तसटशस्यापि भवत्युच्चाटने ध्रुवं स्त्र्युच्चाटने शनौ
प्रभातसमये कृत्वा कर्माह्निकं सुधीः प्रागत्पार्वनशय्यांतु
जपेन्मंत्रायुतं शिवे होमयेत्सर्पिरंभोज सहस्राणि च तद्द
शा ग्रहाणां देवकोपानां यक्षाणां राक्षसानां तथा उपद्रवा

पं॰
२
17

णां सर्वेषां भयानांल्पनेस्तथा क्रूराणामतिहृष्टीनां महा
शान्तिःप्रजायते इतिशान्तिकम् सर्ववारेषु सर्वत्र जपेन्मंत्रं
समाप्नुते होमयेत्सर्पिरक्षोट मिश्रं चंदनमिश्रितं पायसान्न
कमिश्रं च मीनमांससमन्वितं देवतानां मनुष्याणां राज्ञा
नानां महेश्वरि बलादीनांल्पादीनां महापुष्टिः प्रजायते
इतिपौष्टिकम् इतीदं पटले गोप्यं प्रथमांगं महेश्वरि सारं
त्रिपुरसुंदर्याः रक्षणीयं स्वपुत्रवत् गुह्याद्गुह्यतमं गोप्यं गो
पनीयं स्वयोनिवत् इति श्रीरुद्रयामले तन्त्रे देवीभैरवसं
वादे महात्रिपुरसुंदरीपटलः समाप्तः ॥

ॐस्वस्तिश्रीगणेशायनमः ॐश्रीगुरवेसरस्वतीरूपायनमः ॐ
श्री॰ देव्यैसदासुफलदायिन्यैनमः ॐनमोभगवतेशिवमूर्त्तयेन
१ मः ॐनमःश्रीमहात्रिपुरसुंदर्यै श्रीभैरवउवाच अधुनादेवि
वक्ष्यामि श्रीविद्यार्चनपद्धतिं गद्यपद्यमयींगोप्यां सकलाग
मनिश्चितां १ प्रातःकृत्यमकृत्वातु योदेवीमर्चयेत्‌ त
स्यपूजातुविफला प्रोक्ताहीनायथाक्रिया २ तत्रश्रीमान्साध
को ब्राह्मेमुहूर्त्तेशयनतलादुत्थाय करचरणमुखानि स्वमूला
स्त्रमंत्रेणप्रक्षाल्य मूलमंत्रेण आचम्य निजासनेसमुपविश्य
निजशिरसि श्वेतवर्णाधोमुखे सहस्रदलकमलकर्णिकांत

गीत चंद्रमंडलसिंहासनोपरि निषण्णं स्वगुरुं शुक्लवर्णं शुक्ला
लंकारभूषितं ज्ञानानंदमुदितमानसं सच्चिदानंदविग्रहं
त्रिनेत्रं चतुर्भुजं ज्ञानमुद्रापुस्तकवराभयकरं वामांगे वा
महस्तधृतरक्तकमलया रक्तवसनाभरणया स्वप्रियया द
क्षिणभुजेनालिंगितं सर्वदेवदेवं सर्वतीर्थतीर्थं परमशिव
स्वरूपं शांतं स्वप्रसन्नं ध्यात्वा तच्चरणकमलयुगलविगलद
मृतधारया स्वात्मानं स्नुतं विभाव्य मानसोपचारैः गुरुं पूज्य. यथा
ॐ ऐं ह्रीं श्रीं लं पृथिव्यात्मकं श्रीगुरुमूर्तये गंधं समर्पयामि नमः हं आका
शात्मकं पुष्पं श्रीगुरुमूर्तये समर्पयामि नमः यं वाय्वात्मकं

पूं
२

षपं श्रीगुरुमूर्तये समर्पयामि नमः रं वह्न्यात्मके दीपं श्रीगुरु
मूर्तये समर्पयामि नमः वं अमृतात्मके नानानैवेद्यं श्रीगुरुमू
र्तये समर्पयामि नमः सं सर्वात्मके फलमूलतांबूलं श्रीगुरुमू
र्तये समर्पयामि नमः इति मानसोपचारैर्गुरुं संपूज्य मनसागं
धपुष्पधूपदीपनैवेद्यादिभिरभ्यर्च्य प्रणम्य च ॐ अस्य श्रीगुरु
मंत्रस्य सनत्कुमारऋषिः पंक्तिश्छंदः श्रीअमुकानंदनाथो दे
वता ऐं बीजं ह्रीं शक्तिः श्रीं कीलकं मम श्रीधर्मार्थकाममोक्षा
र्थे जपे विनियोगः इति कृतांजलिः स्वन्यान्यसेद्यथा सनत्कुमा
रऋषये नमः शिरसि पंक्तिश्छंदसे नमो मुखे श्रीअमुकानंद

नार्षदेवतायैनमः हृदि ऐंबीजायनमः गुह्ये ह्रींशक्तयेनमः
पादयोः श्रींकीलकायनमः नाभौ ममश्रीधर्मार्थकाममोक्षा
र्थेजपेविनियोगः सर्वांगेषु इतिऋष्यादिन्यासः अथकरन्या
सः ॐऐंह्रींश्रींअंगुष्ठाभ्यांनमः हसखफ्रेंतर्जनीभ्यांस्वाहा ह
सरक्षमलवयऊंमध्यमाभ्यांवषट् सहखफ्रेंअनामिकाभ्यांहुं
सहरक्षमलवयऊंकनिष्ठिकाभ्यांवौषट् स्हौंःस्हौंःअमुकानं
पादुकांश्री
दनाथश्रीअमुकांबाश्रीपादुकांपूजयामिनमः करतलकर
पृष्ठाभ्यांफट् इतिकरन्यासः अथषडंगन्यासः ॐऐंह्रींश्रींहृ
दयायनमः हसखफ्रेंशिरसेस्वाहा हसरक्षमलवयऊंशि

श्रीस्वामिमुकुन्दकौलानंदनाथश्री
पादुकां श्रीसुन्दरमालांबाश्रीपादुकां

खायैवौषट् सहख्फ्रें कवचायहुं सहरक्षमलवयऊं नेत्रत्रया
यवौषट् स्हौंः स्हौंः अस्त्रायफट्॥ इतिषडंगन्यासः॥ ॐ ऐं ह्रीं श्रीं हस
ख्फ्रें हसक्षमलवयरूं सहख्फ्रें सहरक्षमलवयऊं स्हौंः स्हौंः
श्रीमन्श्री गुरुसुनाहिबकौलानंदनाथश्रीपादुकां श्रीसुनमालांबाश्रीपादुकां पूजयामि
नमः॥

इतिश्रीगुरुपादुकामंत्रं

इतिदशधाविमृश्य॥ दंडवत्प्रणामं मनसाकुर्यात्॥ तत्रप्रणाम
मंत्रायथा॥ सहस्रदलपंकजे सकलशीतरश्मिप्रभे, वराभय
करांबुजे विमलगंधपुष्पांबरे। प्रसन्नवदनेक्षणे, सकलदेव
तारूपिणीं, स्मरेशिरसिहंसगंतदभिधानपूर्वंगुरुम्॥ स्वेनेस्वे

नविलेपमाल्यवसनंवामेनरक्तोत्पलं । बिभ्रत्याप्रिययेन्तरेण
नरसांश्लिष्टंप्रसन्नाननम् । हस्ताभ्यामभयंवरंचदधतंशंभुस्व
रूपंपरं । हालालोहितलोचनोत्पलयुगंवंदेशिरःस्थंगुरुम् ॥ इ
तिध्यात्वा ॥ ॐनमामिसद्गुरुंशांतंप्रत्यक्षंशिवरूपिणं शिरसायो
गपीठस्थंमुक्तिकामार्थसिद्धये १ श्रीगुरुंपरमानंदंवंदाम्याने
दंवंदाम्यानंदविग्रहं । यस्यसान्निध्यमात्रेणचिदानंदायतेपरं ॥ २
नमोस्तुगुरवेतस्मायिष्टदेवस्वरूपिणे । यस्यवागमृतंहंतिविषं
संसारसंज्ञकं ॥ अखंडमंडलाकारंव्याप्तंयेनचराचरं । तत्पदंदर्शि
तंयेनतस्मैश्रीगुरवेनमः ॥ ३ अज्ञानतिमिरांधस्यज्ञानांजनश

पू॰ ५
4

लाकया चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ गुरुर्ब्रह्मा गु
रुर्विष्णुर्गुरुः साक्षान्महेश्वरः । गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे
नमः नमस्तेनाथ भगवन् शिवाय गुरुरूपिणे विद्यावतार
संसिद्ध्यै स्वीकृतानेकविग्रह । नवाय नवरूपाय परमार्थैकरू
पिणे सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते ॥ स्वतन्त्राय दया
क्लृप्तविग्रहाय परात्मने । परतन्त्राय भक्तानां भव्यानां भव्यरू
पिणे विवेकिनां विवेकाय विमर्शाय विमर्शिनां प्रकाशिनां
प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ५ पुरस्तात्पार्श्वयोः पृष्ठे नम
स्कुर्यामुपर्यधः । सदा मच्चित्तरूपेण विधेहि भवदासनं ॥ त्वत्प्र

ॐ ह भवस्य संसारस्य दासनं नाशं ॥
शास्ट नये इतिपाठः

मादादहंदेवहृतनहृत्योस्मिसर्वेतः मायामत्रमहापाशा
द्विमुक्तोस्मिशिवोस्मिच इत्येतैर्मंत्रैः श्रीगुरुंदेवंमनसा
प्रणम्य अथदशमुद्रा योनीलिंगयैतुकपालज्ञानत्रिशूल
पुस्तक वनमाला नमस्कार महामुद्राभिः प्रणम्य स्वप्रस
न्नेविभाव्यमनसानदाज्ञांगृहीत्वा मूलाधारेस्वर्णवर्णेचत
र्दलकमलकर्णिकांतर्गत शृंगाटकपीठांतर्गतत्रिकोण
पीठोपरि परांपराशक्तिंकुंडलिनीं सर्पाकारां मूर्धमुखींसार्ध
त्रिवलयां उद्यद्दिनकरसहस्रभास्वतींविद्युत्कोटिसन्निभां
बिसतंतुतनीयसीं पंचाशद्वर्णविग्रहां मृष्टात्रिंशत्कला

मायाबीजसिंहासनस्थितां ३

पू॰ ५
5

रूपिणीं। त्रिधामयामातं। सर्वप्राणिजीवां सर्वदेवाधिदेवीं
सकलमंत्रमातरं। सञ्चिंत्य विभाव्य। गुरूपदिष्टमार्गेणनिजम
हजनादेन सचैतन्यां विधाय तत्र चतुर्दलेषु ॐ ऐं ह्रीं श्रीं
वं नमः ॐ ऐं ह्रीं श्रीं शं नमः ॐ ऐं ह्रीं श्रीं षं नमः ॐ ऐं ह्रीं श्रीं सं न
मः इति पत्रेषु मध्ये मूलेन च ग्राटहितार्पणेन संपूज्य हंसः इति
मंत्रेण कमलात्कमलांतरं नीत्वा॥ ततः स्वाधिष्ठाने लिंगमूले
विद्रुमवर्णे षट्दलकमले तां नीत्वा तत्र ॐ ऐं ह्रीं श्रीं बं नमः
ॐ ऐं ह्रीं श्रीं भं नमः ॐ ऐं ह्रीं श्रीं मं नमः ॐ ऐं ह्रीं श्रीं यं नमः ॐ
ऐं ह्रीं श्रीं रं नमः ॐ ऐं ह्रीं श्रीं लं नमः इति पत्रेषु मध्ये मूलेन च

संपूज्य॥ ततो मणिपूरके नाभौ नीलवर्णे दशदलकमले तां
नीत्वा॥ तत्र। ॐ ऐं ह्रीं श्रीं डं नमः ॐ ऐं ह्रीं श्रीं ढं नमः ॐ ऐं ह्रीं श्रीं णं
नमः ॐ ऐं ह्रीं श्रीं तं नमः ॐ ऐं ह्रीं श्रीं थं नमः ॐ ऐं ह्रीं श्रीं दं नमः
ॐ ऐं ह्रीं श्रीं धं नमः ॐ ऐं ह्रीं श्रीं नं नमः ॐ ऐं ह्रीं श्रीं पं नमः ॐ ऐं
ह्रीं श्रीं फं नमः इति पत्रेषु मध्ये मूलेन च संपूज्य ततो वक्षस्य 15
नाहते पिंगलवर्णे द्वादशदलकमले तां नीत्वा तत्र ॐ ऐं ह्रीं
श्रीं कं नमः ॐ ऐं ह्रीं श्रीं खं नमः ॐ ऐं ह्रीं श्रीं गं नमः ॐ ऐं ह्रीं श्रीं
घं नमः ॐ ऐं ह्रीं श्रीं ङं नमः ॐ ऐं ह्रीं श्रीं चं नमः ॐ ऐं ह्रीं श्रीं छं
नमः ॐ ऐं ह्रीं श्रीं जं नमः ॐ ऐं ह्रीं श्रीं झं नमः ॐ ऐं ह्रीं श्रीं ञं न

मः ॐऐंह्रींश्रींटंनमः॥ ॐऐंह्रींश्रींठंनमः इतिपत्रेषु मध्येमू
लेनचसंपूज्य॥ ततोविशुद्धौकंठे धूम्रवर्णेषोडशदलकमले
तान्नीत्वा तत्र ॐऐंह्रींश्रींअंनमः ॐऐंह्रींश्रींआंनमः ॐऐंह्री
श्रींइंनमः ॐऐंह्रींश्रींईंनमः ॐऐंह्रींश्रींउंनमः ॐऐंह्रींश्रींऊं
नमः ॐऐंह्रींश्रींऋंनमः ॐऐंह्रींश्रींॠंनमः ॐऐंह्रींश्रींऌंन
मः ॐऐंह्रींश्रींॡंनमः ॐऐंह्रींश्रींएंनमः ॐऐंह्रींश्रींऐंनमः
ॐऐंह्रींश्रींओंनमः ॐऐंह्रींश्रींऔंनमः ॐऐंह्रींश्रींअंनमः ॐऐंह्री
श्रींअःनमः इतिपत्रेषु॥ मध्येमूलेनचसंपूज्य ततोभ्रूमध्येआ
ज्ञाचक्रेविद्युद्वर्णेद्विदलकमलेतान्नीत्वा। तत्र॥ ॐऐंह्रींश्रींहंन

मः ॐ ऐं ह्रीं श्रीं लं नमः इति पत्रयोर्मध्ये मूलेन च संपूज्य ततो
ब्रह्मरंध्रगतसहस्रदलकमले प्रापय्य तत्र विंदुरूपतेजोमय
परमशिवेन सहैकतां नीत्वा॥ ततः स्वचता परमात्मने नतोसत
ध्य॥ तत्र नादस्य वर्णानन्तपरो मुहूर्तेन लयं विभाव्य॥ ततो वरो हंसो
हमिति मंत्रेण ततो कुंडलिनी आज्ञाचक्रे विशुद्धर्णो द्विदलकमले
समानीय॥ तत्र॥ ॐ ऐं ह्रीं श्रीं हं नमः ॐ ऐं ह्रीं श्रीं क्षं नमः॥ इति पत्रयोः
मध्ये मूलेन च संपूज्य॥ ततो विशुद्धो कंठे षष्ठवर्णे षोडशादलक
मलेनामानीय॥ तत्र॥ ॐ ऐं ह्रीं श्रीं अं नमः॥ ॐ ऐं ह्रीं श्रीं आं नमः ॐ
ऐं ह्रीं श्रीं इं नमः॥ ॐ ऐं ह्रीं श्रीं ईं नमः॥ ॐ ऐं ह्रीं श्रीं उं नमः॥ ॐ ऐं ह्रीं

पूं ८

श्रीं उं नमः ॐ ऐं ह्रीं श्रीं ऊं नमः ॐ ऐं ह्रीं श्रीं ऋं नमः ॐ ऐं ह्रीं श्रीं ॠं
नमः ॐ ऐं ह्रीं श्रीं लृं नमः। ॐ ऐं ह्रीं श्रीं ॡं नमः। ॐ ऐं ह्रीं श्रीं एं नमः
ॐ ऐं ह्रीं श्रीं ऐं नमः। ॐ ऐं ह्रीं श्रीं ओं नमः। ॐ ऐं ह्रीं श्रीं औं नमः। ॐ ऐं
ह्रीं श्रीं अं नमः ॐ ऐं ह्रीं श्रीं अः नमः इति पत्रेषु अथ मूलेन चाभ्य
र्च्य॥ ततो वक्त्रस्य नाहते पिंगलवर्णे द्वादशदलकमले तां समा
नीय। तत्र। ॐ ऐं ह्रीं श्रीं कं नमः ॐ ऐं ह्रीं श्रीं खं नमः ॐ ऐं ह्रीं श्रीं गं
नमः ॐ ऐं ह्रीं श्रीं घं नमः ॐ ऐं ह्रीं श्रीं ङं नमः ॐ ऐं ह्रीं श्रीं चं नमः
ॐ ऐं ह्रीं श्रीं छं नमः ॐ ऐं ह्रीं श्रीं जं नमः ॐ ऐं ह्रीं श्रीं झं नमः ॐ ऐं
ह्रीं श्रीं ञं नमः ॐ ऐं ह्रीं श्रीं टं नमः ॐ ऐं ह्रीं श्रीं ठं नमः इति पत्रेषु

मध्येमूलेनचाभ्यर्च्य ततोमणिपूरेनाभौनीलवर्णंदशदलक
मलेतांसमानीय तत्र ॐऐंह्रींश्रींडंनमः ॐऐंह्रींश्रींढंनमः
ॐऐंह्रींश्रींणंनमः ॐऐंह्रींश्रींतंनमः, ॐऐंह्रींश्रींथंनमः, ॐऐं
ह्रींश्रींदंनमः, ॐऐंह्रींश्रींधंनमः, ॐऐंह्रींश्रींनंनमः, ॐऐंह्रींश्रीं
पंनमः, ॐऐंह्रींश्रींफंनमः, इतिपत्रेषु मध्येमूलेनचसंपूज्य
ततः स्वाधिष्ठानेलिंगमूलेविद्रुमवर्णंषड्दलकमलेतांसमा
नीय तत्र ॐऐंह्रींश्रींवंनमः ॐऐंह्रींश्रींभंनमः ॐऐंह्रींश्रींमं
नमः ॐऐंह्रींश्रींयंनमः ॐऐंह्रींश्रींरंनमः ॐऐंह्रींश्रींलंनमः
इतिपत्रेषु मध्येमूलेनचाभ्यर्च्य ततोमूलाधारेस्वर्णवर्णंचतु

पूः ८
46

ईलकमलेतांसमानीय तत्रस्थापयेत् ततोमूलाधारे ॐऐंह्रीं
श्रींवंनमः ॐऐंह्रींश्रींशंनमः ॐऐंह्रींश्रींषंनमः ॐऐंह्रींश्रींसं
नमः इतिपत्रेष्वभ्यर्च्य मध्येमूलेनतांसमर्चयेत् इत्यारोहावरो
हक्रमेणपरांशक्तिंकुंडलिनींध्यात्वा ॥ प्रकाशमानांप्रथमेप्र
प्रयाणेप्रतिप्रयाणेप्यमृतायमानां अंतःपदव्यामनुसंचर
न्तीमानंदरूपामबलांप्रपद्ये ॥ अहंदेवीनचान्योस्मिब्रह्मैवाहंन
शोकभाक् सच्चिदानंदरूपोहमात्मानंचविचिंतयेत् ॥ नाहमस्मि
नचान्योस्तिब्रह्मैवाहंनशोकभाक् सच्चिदानंदरूपोहंस्वात्मा
नमितिचिंतयेत् ॥ हंसमंत्रेणलयंविभावयेत् ॥ मूलाधारेवह्निमं

धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिंगिनी सु
श्री सुरूपा कपिला हव्यकव्यवहा तथा ॥

ऽलं दशकलात्मकं विभाव्य तत्र मूलविद्यायाः प्रथमे कूटे
वाग्भवाख्ये संस्फुरत्तडिल्लताभास्वरे अनाहतपर्यन्तप्रसमनाद
शिवे विभाव्य अनाहते सूर्यमंडले द्वादशकलात्मकं ध्यात्वा
तन्मध्ये मूलविद्यायाः कामराजाख्ये द्वितीये कूटे उद्यदादित्यसं
काशमाज्ञाचक्रपर्यन्तप्रसमनादशिवे प्रथकर्ध्वप्रसृतरश्मि
कं ध्यात्वा आज्ञायां सोममंडले षोडशकलात्मकं विभाव्य त
न्मध्ये मूलविद्यायाः शक्तिकूटाख्ये तृतीये विंदे शशिप्रभे ब्रह्मरं
ध्रांतर्गतविंदहर्षमंडलपर्यंतप्रसमनादशिवे ध्यात्वा ततो मूला
धारादिब्रह्मरंध्रांतं मूलविद्यां उद्यद्दिनकरसहस्रभास्वरां त

तपिन्यै तापिन्यै धूम्रायै
मरीच्यै ज्वालिन्यै रुच्यै सुषु
म्णायै भोगदायै विश्वायै
बोधिन्यै धारिण्यै क्षमायै ॥

अमृता मानदा पूषा तुष्ट्यै पुष्ट्यै रत्यै धृत्यै शशिन्यै चंद्रिकायै कांत्यै
ज्योत्स्नायै श्रियै प्रीत्यै अंगदायै पूर्णायै पूर्णामृतायै ॥

पू॰ ५

ज्योमयीमखंडं ध्यात्वा तत्तेजसा व्याप्तं स्वदेहं विचिंत्य तत्तेजसा
परिणतां श्रीपरदेवतां हृदयकमले ध्यात्वा मानसैरुपचारैः
संपूज्य ॐ ऐं ह्रीं श्रीं लं पृथिव्यात्मकं गंधं श्रीमहात्रिपुरसुन्दरी
श्रीपाडुकायै समर्पयामि नमः ॐ ऐं ह्रीं श्रीं हं आकाशात्मकं पुष्पं
श्रीमहात्रिपुरसुन्दरीश्रीपाडुकायै समर्पयामि नमः ॐ ऐं ह्रीं
श्रीं यं वाय्वात्मकं धूपं श्रीमहात्रिपुरसुन्दरीश्रीपाडुकायै सम
र्पयामि नमः ॐ ऐं ह्रीं श्रीं रं वह्न्यात्मकं दीपं श्रीमहात्रिपुरसुन्दरीश्री
पाडुकायै समर्पयामि नमः ॐ ऐं ह्रीं श्रीं वं अमृतात्मकं नानानैवे
द्यं श्रीमहात्रिपुरसुन्दरीश्रीपाडुकायै समर्पयामि नमः ॐ ऐं

श्रीमहात्रिपुरसुंदरीश्रीपादुकायै नमः

ह्रीं श्रीं सं सर्वात्मकं फलमूलतांबूलादिकं समर्पयामि नमः ॥ प्रा
णायामत्रयं कुर्यात् यथा तत्र विहितपद्मासनः साधको मूलाधा
रार्पितहृत्तिः मूलं प्रणवं वा षोडशवारमुच्चरन् दक्षांगुष्ठेन दक्षना
सापुटं निरुध्य वामेन पवनं पूरयेत् ततस्तमेव चतुःषष्टिवारमु
च्चरन् दक्षानामाकनिष्ठिकाभ्यां वामं नासापुटं च तथैव निरुध्य द्वा
भ्यां पवनं कुंभयेत् ततस्तमेव द्वात्रिंशद्वारमुच्चरन् वामपुटं च त
थैव निरुध्य दक्षेण पवनं रेचयेत् इत्येकः प्राणायामः एवमेव विप
र्ययेण कृतो द्वितीयः ॥ प्रथमवत् तृतीयः ॥ इत्थं प्राणायामत्रयेण नि
रस्तसकलकलुषं देवतायतनयोग्यं स्वशरीरं विभाव्य ॥ ऋष्यादि

धृतिः

इडया पिब षोडशभिः पवनं,
उदरे षष्टिचतुष्टयमंतरगम्,
त्यज पिंगलयाप्यनेकैः शनैः
दशभिर्दशभिर्दशभिर्द्व्यधिकैः ॥
इति प्राणायामोद्धारः ॥

पृ. ९

स्मरणंविदधीतयथा आदौगणपतिमंत्रन्यासंजपेत् अस्यश्री
कामेश्वरमंत्रस्य दक्षिणामूर्तिऋषिः पंक्तिश्छंदः श्रीकामेश्वरोदे
वता श्रींबीजं ह्रींशक्तिः क्लींकीलकं श्रीविद्यासाधनार्थेजपे
विनियोगः दक्षिणामूर्तिऋषयेनमः शिरसि पंक्तिश्छंदसेन
मः मुखे श्रीकामेश्वरोदेवतायैनमः हृदि श्रींबीजायनमः गु
ह्ये ह्रींशक्तयेनमः पादयोः क्लींकीलकायनमः नाभौ श्रीवि
द्यासाधनार्थेजपेविनियोगः सर्वांगेषु ऐंअंगुष्ठाभ्यांनमः क्लीं
तर्जनीभ्यांस्वाहा सौंःमध्यमाभ्यांवषट् ऐंअनामिकाभ्यांहुं क्लीं
कनिष्ठिकाभ्यांवौषट् सौंःकरतलकरपृष्ठाभ्यांफट् इतिकर

न्यासः अथहृदयादिन्यासः ऐं हृदयाय नमः क्लीं शिरसे
स्वाहा सौः शिखायै वषट् ऐं कवचाय हुं क्लीं नेत्रत्रयाय वौ
षट् सौः अस्त्राय फट् इति हृदयादिन्यासः अथध्यानं उद्य
न्मार्तंडकोटिद्युतिममृतकलाशेखरं श्यामकंठं मुक्ताभस्मा श्यामकंठं श्यामः कंठे यस्य यद्वा श्यामादेवी कंठे यस्य
हिरत्नैर्विलसितवपुषं त्रीक्षणं चापबाणान् विभ्राणं पाश
मुद्रैः सृणिमपि च करैर्भूषितं देवदेव्या वामांके नौमि कामे
श्वरममृतपतिं विश्वमूर्तिं ममूर्तिं ॥ अथ मंत्रं यथाशक्ति जपे
त् जपांते प्राणायामन्यासध्यानादिकं कृत्वा समर्पयेत् ॥ ॐ
अस्य श्रीमहात्रिपुरसुंदरीमंत्रराजस्य श्रीदक्षिणामूर्तिर्ऋ

पू॰ षिः पंक्तिश्छंदः श्रीमहात्रिपुरसुंदरीदेवता पेंकएईलह्रीं
११ बीजं सौंः सकलह्रींशक्तिः क्लींहसकहलह्रींकीलकं म
मश्रीधर्मार्थकाममोक्षार्थे श्रीमहात्रिपुरसुंदरीमंत्रजपेवि
नियोगः इतिकृतांजलिः स्वान्यसेत् अथऋष्यादिन्यासः
श्रीदक्षिणामूर्तिऋषयेनमः शिरसि पंक्तिछंदसेनमः मुखे
श्रीमहात्रिपुरसुंदरीदेवतायैनमः हृदि पेंकएईलह्रींबी
जायनमः गुह्ये सौंः सकलह्रींशक्तयेनमः पादयोः क्लींह
१८ सकलह्रींकीलकायनमो नाभौ मम श्रीधर्मार्थकाममोक्षार्थे
श्रीमहात्रिपुरसुंदरीमंत्रजपेविनियोगः सर्वांगेषु इति

ऋष्यादिन्यासः अथकरन्यासः ऐंप्रथमकूटंअंगुष्ठाभ्यांन
मः क्लींद्वितीयकूटंतर्जनीभ्यांस्वाहा सौंःतृतीयकूटंमध्य
माभ्यांवौषट् ऐंप्रथमकूटंअनामिकाभ्यांहुम् क्लींद्वितीय
कूटंकनिष्ठिकाभ्यांवषट् सौंःतृतीयकूटंकरतलकरपृ
ष्ठाभ्यांफट् इतिकरन्यासः अथषडंगन्यासः ऐंप्रथमकूटं
हृदयायनमः क्लींद्वितीयकूटंशिरसेस्वाहा सौंःतृतीय
कूटंशिखायैवषट् ऐंप्रथमकूटंकवचायहुं क्लींद्वितीय
कूटंनेत्रत्रयायवौषट् सौंःतृतीयकूटंअस्त्रायफट् इतिष
डंगन्यासः अथध्याने ॐसूर्यकोटिसमानाभां चतुर्बाहुंत्रि

लोचनां॥ पाशांकुशचापबाणान् धारयंतीं शिवां भजे॥ इति स्व
हृत्कमलकर्णिकामध्ये श्रीमहात्रिपुरसुंदरीस्वाभेदेन ध्या
त्वा ऐं कएईलह्रीं त्रिपुरादेवि विद्महे क्लीं हसकलह्रीं कामेश्व
रि धीमहि सौः सकलह्रीं तन्नः शक्तिः प्रचोदयात् इति सकल
मंत्रदोषनिवारणार्थं गायत्रीं दशधा जपेत् श्रीकामेश्वरभै
रवमंत्रं दशधा जप्त्वा १० ॐ मूलं ॐ इत्यशौचद्वयनिवारणा
र्थं सप्तधा जपेत् ७ ॐ मां माले महामाले सर्वशक्तिस्व
रूपिणि चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव इति मा
लां वामकरे निधाय ॐ सिद्ध्यै नमः इति मालां गंधादिना संपू
मंत्रेण

जप गेश्रविघ्नंऊरुमालेत्वं इतिदक्षकरेणमालांगृहीत्वा स्व
शिरसिस्वगुरुं कंठे पीतवर्णांमूलविद्यां हृदये श्रीपरदे
वतां श्रीगुरुचरणयोःस्वात्मानंध्यात्वा भ्रूमध्येतेषांचव
र्णामैक्यंविभाव्य विशुद्धौचक्रद्वयमेकीभूतमक्षरात्मक
मानीय दृष्टिंकृत्वानासाग्रेनिमील्यनयनेप्यथवा जिह्वां
लंबांसमासाद्यदंतैर्दंतानपीडयन् ओष्ठौसंपुटकौकृत्वा
स्थिरचित्तःस्थिरेंद्रियः महादेवींहृदिध्यात्वामौनीजपम
प्यारभेत् यथाशक्तिजपंकुर्यात् जपांतेत्वंमालेसर्वदेवा
नांसिद्धिदाशुभदामता शुभंकुरुष्वमेभद्रेयशोवीर्यंचस

कं शिरसि,
स्वकेगुरुं शुक्लवर्णं कंठे पीतां मूलविद्यां
हृदि ध्यानोक्तरूपां च श्रीगुरोः के पदद्वयम्
आज्ञायां भ्रूमध्ये नैक्यं ध्यात्वा पश्चात् स्मरेत् इति.

ॐ ऐं ह्रीं श्रीं

पू॰ १३

13

वैदा इतिमालांस्वशिरसिसंस्थाप्य पुनरपिप्राणायामकर
आदिकरषडंगन्यासान्विधाय श्रीईश्वरमंत्रेदृशाथाजप्त्वा ॥
ॐगुह्यातिगुह्यगोप्त्रीत्वंगृहाणास्मत्कृतंजपं सिद्धिर्भवतु
मेदेवित्वत्प्रसादान्महेश्वरि इतितेजोरूपंजपफलंश्रीदेवी
वामहस्तेसमर्प्य योनिमुद्रयाप्रणमेत् मालांमूलेनसंपू
ज्य ॐऐंह्रींश्रींमांमालेमालेमहामालेसर्वशक्तिस्वरूपिणि
चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव इतिमंत्रेण मालां
रहसिस्थापयेत् ॐअस्यश्रीत्रिपुरामंत्रस्य श्रीदक्षिणामूर्ति
ऋषिः पंक्तिःछंदः श्रीत्रिपुरादेवता श्रींबीजं ह्रींशक्तिः

क्लींकीलकं ममश्रीधर्मार्थकाममोक्षार्थेजपेविनियोगः
इतिकृतांजलिःस्मरन्न्यसेन्न्यथा श्रीदक्षिणामूर्तिऋषये
नमः शिरसि पंक्तिछंदसेनमः मुखे श्रीत्रिपुरादेवतायैनमः
हृदि श्रींबीजायनमः गुह्ये ह्रींशक्तयेनमः पादयोः क्लींकी
लकायनमः नाभौ ममश्रीधर्मार्थकाममोक्षार्थेजपेविनि
योगः सर्वांगेषु इतिऋष्यादिन्यासः अथकरन्यासः श्रींह्रींक्लीं
ऐंसौंःअंगुष्ठाभ्यांनमः ॐह्रींश्रींतर्जनीभ्यांस्वाहा कएलईह्रीं
मध्यमाभ्यांवषट् हसकहलह्रींअनामिकाभ्यांहुं सकलह्रीं
कनिष्ठिकाभ्यांवौषट् सौंःऐंक्लींह्रींश्रींकरतलकरपृष्ठाभ्यां

पू: २४

14

फट् इति करन्यासः अथ हृदयादिन्यासः श्रीं ह्रीं क्लीं ऐं सौः हृद
यायनमः ॐ ह्रीं श्रीं शिरसे स्वाहा कएलईह्रीं शिखायै वौषट्
हसकहलह्रीं कवचाय हुं सकलह्रीं नेत्रत्रयाय वषट् सौः ऐं
क्लीं ह्रीं श्रीं अस्त्राय फट् इति हृदयादिन्यासः अथ ध्यानं चंद्रार्का
नलकोटिनीरदरुचिं पाशांकुशौ सास्तृगाम् मुंडं खड्गमभीति
मीश्वरवरं हस्तांबुजैर्बिभ्रतीं कामेशानशवोपरिस्थितिपदां
मत्तीं वहंतीं परां श्रीचिंतामणिमंत्रबीजवपुषं ध्यायेन्महाषो
डशीं इति स्वहृदि देवीं ध्यात्वा मानसोपचारैर्देवीं संपूजयेद्यथा
ॐ लं पृथिव्यात्मकं गंधं श्रीत्रिपुरायै समर्पयामि नमः ॐ हं

कर्तुमकर्तुमन्यथाकर्तुमसम र्थं वरं भक्तेभ्युत्थितो

स्वाभेदेन

ऐं ह्रीं श्रीं

आकाशात्मकं पुष्पं श्रीत्रिपुरायै समर्पयामि नमः ॐ यं वाय्वा
त्मकं धूपं श्रीत्रिपुरायै समर्पयामि नमः ॐ रं वह्न्यात्मकं दीपं
श्रीत्रिपुरायै समर्पयामि नमः ॐ वं अमृतात्मकं नानानैवेद्यं
श्रीत्रिपुरायै समर्पयामि नमः ॐ सं सर्वात्मकं फलमूलताम्बू
लं श्रीत्रिपुरायै समर्पयामि नमः इति मानसोपचारैर्देवीं संपूज्य
मंत्रसंस्कारं कुर्याद्यथा कं हं सः श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं कएई
लह्रीं हसकहलह्रीं सकलह्रीं सौः ऐं क्लीं ह्रीं श्रीं इत्युत्कीलनमंत्र
विर्जप्या सौः ऐं क्लीं ह्रीं श्रीं श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं कएईलह्रीं
ॐ ह्रीं हसकहलह्रीं सकलह्रीं इति संजीवनमंत्रं विर्जप्या ऐं

पृ० १५

15

क्लींसौंः कपर्दिलं ह्रीं ॐ ह्रीं श्रीं सदाशिवस्य शापं मोचय सकलं ह्रीं
इति शापहारिमन्त्रं दशधा जप्त्वा ॐ ऐं नमस्त्रिपुराभ्याय दह दह दह
रितें क्लीं हन हन कीलान् सौः त्रिपुरी स्वाहा इत्युद्धमन्त्रं त्रिर्जप्त्वा
ॐ मूलं ॐ इति सूतकद्वय निवारणार्थं सप्तधा मन्त्रं जप्त्वा इति मं
त्रसंस्कारं कृत्वा मालां वामकरेण गृहीत्वा मन्त्रयेद्यथा माले मा
ले महामाले सर्वशक्तिस्वरूपिणि चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे
सिद्धिदा भव स्वाहा इति मन्त्रेण मालां वामकरेण गृहीत्वा दक्षक
रेण मालां संपूजयेद्यथा ॐ ह्रीं सिद्ध्यै गंधाक्षतपुष्पाणि ये नमः
इति मन्त्रेण गंधाक्षतपुष्पैः मालां संपूज्य ॐ गं अविघ्नं कुरु मे स्वा

× तिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि इति मन्त्रेण श्रीदेव्या वामहस्ते जपं
पंक्तिः ५ समर्प्य ततो देविसुप्रभातस्तवं जप्त्वा स्तुतिं भवेत् यथा

ह्वा इति मंत्रेण मालां दक्षकरेणा गृहीत्वा यथाशक्ति साधकेशः
जपं कृत्वा शनैः परे इति मंत्रेण मालां स्वशिरसि संस्थाप्य पुन
रपि प्राणायामऋष्यादिकरषडंगन्यासादिकं विधाय सकलह्रीं
श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं कएईलह्रीं हसकहलह्रीं सौः ऐं क्लीं
ह्रीं श्रीं इति संपुटमंत्रं विजप्त्वा गृह्या॰ ॐ प्रातर्नमामि जगतां जन
न्याश्चरणांबुजं श्रीमत्त्रिपुरसुंदर्या नमिताया हराादिभिः प्रात
स्त्रिपुरसुंदर्या नमामि चरणांबुजम् हरिर्हरो विरिंचिश्च सृष्ट्या
दीन्कुरुते यया प्रातस्त्रिपुरसुंदर्या नमामि पादपंकजम् य
त्पाद्यमंबु शिरसि भाति गंगा महेशितुः २ प्रातः पाशांकुशशर

पादाय इति पाद्यं

सकलह्रीं

तिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्, सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि,, इति मंत्रेण श्रीदेव्या वामहस्ते जपं समर्प्य ततो देविसुप्रभातस्तवं जप्त्वा स्तुतिं भवेत् यथा॰

पू॰
८९
16

चापहस्तां नमाम्यहम् उद्यदादित्यसंकाशां श्रीमत्त्रिपुरसुंदरी
म् ४ प्रातर्नमामि पादाब्जं ययेदं भासते जगत् तस्यास्त्रिपुरसुं
दर्या यत्प्रसादान्निवर्तते ५ यः श्लोकपंचकमिदं प्रातर्नित्यंप
ठेन्नरः तस्मै दद्यादात्मपदं श्रीमत्त्रिपुरसुंदरी ६ इति श्रीगुरुमू
र्तिं स्मृत्वा श्रीदेवीं मनसा प्रणम्य निजहृत्सं समर्पयेत् ॐ प्रातः
प्रभृति सायान्तं सायादि प्रातरन्ततः यत्करोमि जगन्मातस्तदस्तु
तव पूजनं इति समर्प्य स्वकार्यानुष्ठानाय ॐ त्रैलोक्यचैतन्य
मयेश्वरेशि श्रीसुंदरि त्वच्चरणाज्ञयैव प्रातः समुत्थाय तव प्रि
यार्थं संसारयात्रामनुवर्तयिष्ये १ संसारयात्रामनुवर्तमा

नैत्वदाज्ञयाश्रीत्रिपुरेपरेशि स्पर्धातिरस्कारकलिप्रमादभ
यानिमांमाभिभवंतुमातः २ जानामिधर्मंनचमेप्रवृत्तिःजा
नाम्यधर्मंनचमेनिवृत्तिः त्वयाहृषीकेशिहृदिस्थयाहंयथा
नियुक्तोस्मितथाचरामि ३ इतिदेव्याज्ञांप्रार्थयित्वा गुरूपदे
शितानेसहजसिद्धंअजपाजपंतत्तद्देवताभ्यःसंकल्प्यसम
र्पयेत् ॐअद्यपूर्वेद्युरहोरात्राचरितमुच्छ्वासनिःश्वासात्मकंष
ट्शताधिकमेकविंशतिसहस्रसंख्याकमजपाजपं मूलाधा
रस्वाधिष्ठानमणिपूरकानाहत विशुद्धाज्ञाब्रह्मरंध्रेषु चतुर्द
लषट्दलदशदलद्वादशदलषोडशदलद्विदलसहस्रदले

७ स्वर्णविद्रुमनीलपिंगलधूम्रविद्युत्कर्बुरवर्णेषु स्थिताभ्यो
पू॰ १७ गणपतिब्रह्मविष्णुरुद्रजीवात्मपरमात्मश्रीगुरुपादुकाभ्यो
यथाभागशः समर्पयिष्यामि इति कृतांजलिः संकल्पं समर्प
येद्यथा हकारेण वहिर्याति सकारेण विशेत्पुनः हंसहंसेति
मंत्रेण जीवो जपति सर्वदा वणाष्टमृदलयुक्ते सम्यगाधारपद्मे
तरुणमरुणगात्रं वारणास्यं गणेशं अभयवरदहस्तं चारुपा
शांकुशौ वा करयुगलमनंतं चिंतयेदादिमूर्तिं गायत्री तत्पुरु
षाय विद्महे वक्रतुंडाय धीमहि तन्नो दंती प्रचोदयात् ॐ ऐं
ह्रीं श्रीं मूलाधारचक्रस्थाय गणपतये अजपाजपानां षट्शता

निसमर्पयामिनमः ८०० इतिमूलाधारचक्रेगणपतिसम
र्पयेत् वभमयरलसंज्ञैरक्तैःपत्रक्रमैः स्थितमुर्तिवि
ष्टपंकजेपद्मयोनि अभयवरदहस्तकुंडिकामक्षमाला
विधृतममलरूपंचिंतयेद्विश्वयोनिं वेदात्मकायविद्महे
हिरण्यगर्भायधीमहि तन्नोब्रह्माप्रचोदयात् ॐऐंह्रींश्रीं
स्वाधिष्ठानचक्रस्थायब्रह्मणे अजपाजपानांषट्सहस्राणि
८००० समर्पयामिनमः इतिस्वाधिष्ठानचक्रेब्रह्मणेसमर्प
येत् २ आद्यैःफांतगतैःप्रकल्पितदलैःपद्मेनिविष्टोहरिः
मार्तंडद्युतिमादिपूरुषमजंनारायणंचिंतयेत् चक्रांभोज

पृ: १८

18

गदादिशंखममलंपीतांवरंकौस्तुभं श्रीवत्सांकितनूपुरं
तनुलसत्पीतांवरंचिंतयेत् नारायणायविद्महे वासुदेवा
यधीमहि तन्नोविष्णुःप्रचोदयात् ॐऐंह्रींश्रींमणिपूरक
चक्रस्थायविष्णवेश्रजपाजपानांषट्सहस्राणि ६०००० स
मर्पयामिनमः इतिमणिपूरकचक्रेविष्णवेसमर्पयेत् इ
कार्येःहंतगातेःप्रकल्पितदलैःपंकेरुहेपार्वति कांतेको
नशशांककोटिकिरणप्रद्योतकचत्प्रोज्वले शांतेटंकमृगोच
राभयकरैःयुक्तेकरेकंकणैःश्रैवेयांगदहारनूपुरधरंचमी
वरंचिंतयेत् तत्पुरुषायविद्महे महादेवायधीमहितन्नो

शा

गेजेसः

धी

रुद्रं प्रचोदयात् ॐ पें ह्रीं श्रीं अनाहतचक्रस्थाय रुद्राय अजपा
जपानां षट् सहस्राणि ६००० समर्पयामि नमः इति अना
हतचक्रे रुद्रं समर्पयेत् ॥ ॐ पें ह्रीं श्रीं मत्पोगेष्वनिविष्टमिष्टति
ह्निं पुण्ये स्वधामास्य दंव्यामाशेषब्रवराचरं गणगणैर्ने विश्वयो
निं मृडं ॥ मूर्तामूर्तमनेकमेवममलं ज्योतिः प्रदीपोपमं साक्षा
त्षोडशापत्रके त्वममले जीवं परं चिंतयेत् हंसहंसाय विद्महे
परमहंसाय धीमहि तन्नो हंसः प्रचोदयात् ॐ पें ह्रीं श्रीं विशु
द्धचक्रस्थाय जीवात्मने अजपाजपानामेकसहस्रं १००० सम
र्पयामि नमः इति विशुद्धचक्रे जीवात्मानं समर्पयेत् ॥ ५ हंसं

भ्रांपरिक्रमपत्रममलेदिव्यंजगत्कारणंविस्तीर्णमनेकपत्र
देहविलयस्वछंदमात्रेछया तस्मायोग्यनयास्वदेशानुभा
भावैकदीपांकुरंप्रत्यक्त्वात्वरविग्रहेगुरुपदंध्यायेद्धिभुंशाख
नेहंसहंसायविद्महे परमहंसायधीमहि हंसःसोहंप्रचोद
यात् ॐऐंह्रींश्रींआज्ञाचक्रस्थायपरमात्मनेअजपाजपाना
मेकसहस्रं १००० समर्पयामिनमः इत्याज्ञाचक्रेपरमात्माने
समर्पयेत् ८ विश्वव्यापिनमादिदेवममलेनित्योदितेनिष्कले
नित्योद्भूतसहस्रपत्रकमलेलिप्यात्तरैर्मंडिते नित्यानित्यम
नन्यशरणंपरिचिन्मयस्फुरन्मात्मके विश्वात्मानमरूपविश्व

ऊकरेस्वच्छंदतः सर्वतः निरंजनाय विद्महे निराभासाय धीम
हि अतनुवितनुसूक्ष्मः प्रचोदयात् ॐ ऐं ह्रीं श्रीं सहस्रदलक
मलकर्णिकामध्यस्थायै श्रीगुरुपादुकायै अजपाजपानामे
कसहस्रं १॥ समर्पयामि नमः इति सहस्रदलकमले श्रीगु
रु समर्पयेत् एतावत्कर्तुमशक्तश्चेत् ॐ ऐं ह्रीं श्रीं अद्यपूर्वेद्युर
होरात्राचरितमुच्छ्वासनिःश्वासात्मकं षट्शताधिकमेकवि
शतिसहस्रसंख्याकमजपाजपं ब्रह्मरंध्रस्थसहस्रदलकम
लकर्णिकामध्यवर्तिन्यै श्रीगुरुपादुकायै समर्पयामि नमः
१॥ इति गुरवे एव समर्पयेत् इत्यजपाजपं समर्प्य ॐ अद्यत

यौदयमारभ्यअहोरात्रेणोःश्चासनिःश्वासात्मकंषट् शताधि

पू॰ कमेकविंशत्तिसहस्रसंख्याकमजपाजपमहंकरिष्ये इति

२॰ कृतांजलिःसंकल्प्य अजपामंत्रेणप्राणायामंविधाय संक

ल्पंकुर्याद्यथा ॐअस्यश्रीअजपागायत्रीमंत्रराजस्य हंसऋ

षिः अव्यक्तगायत्रीछंदः परमहंसोदेवता हंबीजं सःशक्तिः

सोहंकीलकं ॐकारस्तत्वंनभःस्थानं हैमोवर्णः उदात्तःस्व

रः ममसोक्षार्थेजपेविनियोगः इतिकृतांजलिःस्तत्वान्यसेत

हंसऋषयेनमः शिरसि अव्यक्तगायत्रीछंदसेनमः मुखे

परमहंसायदेवतायैनमः हृदये हंबीजायनमः गुह्ये सः

शक्तयेनमः पादयोः सोहंकीलकायनमः नाभौ ॐकारा
यतत्वायनमः हृदये नभसेस्थानायनमः मूर्ध्नि हैमाय
वर्णायनमः सर्वांगे उदात्तायस्वरायनमः कंठे इतिविन्य
स्य ममसोहंप्रीत्यर्थेजपेविनियोगः इतिकृतांजलिर्वदेत् इति
ऋष्यादिन्यासः अथकरन्यासः ॐऐंह्रींश्रींहसांसूर्यात्मनेस्वा
हा अंगुष्ठाभ्यांनमः ॐऐंह्रींश्रींहसींसोमात्मनेस्वाहा तर्ज
नीभ्यांस्वाहा ॐऐंह्रींश्रींहसूंनिरंजनात्मनेस्वाहा मध्यमाभ्यां
वषट् ॐऐंह्रींश्रींहसैंनिराभासात्मनेस्वाहा अनामिकाभ्यां
हुं ॐऐंह्रींश्रींहसौंअनंततनुःसूक्ष्मादेवीप्रचोदयात्स्वाहा

कनिष्ठिकाभ्यांवौषट् ॐऐंह्रींश्रींह्सः अव्यक्तबोधात्मनेस्वाहा
पू॰ करतलकरपृष्ठाभ्यांफट् इतिकरन्यासः अथषडंगः ॐऐंह्रीं
२१ श्रींह्स्रांसूर्यात्मनेस्वाहा हृदयायनमः ॐऐंह्रींश्रींह्स्रींसोमात्म
2 नेस्वाहा शिरसेस्वाहा ॐऐंह्रींश्रींह्स्रूंनिरंजनात्मनेस्वाहाशि
खायैवषट् ॐऐंह्रींश्रींह्स्रैंनिराभासात्मनेस्वाहाकवचायहुं
ॐऐंह्रींश्रींह्स्रौंअनंततनुःसूक्ष्मादेवीप्रचोदयात्स्वाहानेत्रत्र
यायवौषट् ॐऐंह्रींश्रींह्स्रः अव्यक्तबोधात्मनेस्वाहाअस्त्राय
फट् इतिषडंगः अथध्यानं ॐयांमूर्धानंयस्यविप्रावदंति खं
वैनाभिंचंद्रसूर्यौचनेत्रे दिग्भिःश्रोत्रेयस्यपादौक्षितिश्च ध्या

ॐ गमागमस्थं गमनादिशून्यं चिद्रूपरूपं तिमिरान्तकारम्
पश्यामि कं सर्वजगत्प्रधानं नमामि हंसं परमात्मरूपम् ॥

नमोऽस्तु सर्वभूतानामात्मने इति विराट्स्वरूपं स्वात्मानं ध्यात्वा
तदनुसंधायी प्राणवायोः निर्गमप्रवेशात्मकमजपामंत्रं पं
चविंशतिवारं जप्त्वा समर्प्य गुरूपदिष्टमार्गेण नादानुसंधान
पूर्वकं निरस्तसमस्तोपाधिना केनापि चिद्विलासेन प्रवर्तमा
नोऽस्मीति विभाव्य स्वकार्यानुष्ठानाय ॐ समुद्रमेखले देवि
पर्वतस्तनमंडले विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे
धारणी पोषणी त्वं तो भूतानां देवि सर्वदा तेन सत्येन मां पा
हि पाशान्मोचय धारिणि इति भूमिं प्रार्थ्य श्वासानुसारेण
तस्यां पादं निधाय प्रातःकृत्यमकृत्वा तयो देवीभक्तितो च

ॐ नंदन्तु साधकाः सर्वे विनश्यन्तु विदूषकाः अवस्था शांभवी मेऽस्तु प्रसन्नोऽस्तु गुरुः सदा इति पठन् प्राप्यामुत्सृजेत् ॥

येत् निष्फलानस्य पूजा स्याच्छौचहीना यथा क्रिया पदे पदे
पृं मूलमुच्चरन् गृहाद्बहिर्निर्गत्य ग्रामाद्बहिर्नैरृत्यां याम्यां
२२ वा दिशि शरक्षेपमात्रां भुवमतीत्य ॐ ठं ठं ठं स्वाहा इति मंत्रे
22 ण पर्णैस्तृणैर्वा भूमिमाच्छाद्य जेत् मलादिकमुत्सृज्य ग्लौं पृ
थिव्यै नमः इति मंत्रेण मृदादिकं शौचं कुर्यात् मलमूत्रोत्स
र्गे शौचाचमनदंतधावनादिकं विधाय प्रतिषिद्धदिनेषु वि
हितकाष्ठेन क्लीं कामदेवाय सर्वजनप्रियाय नमः इति दं
तान्विशोध्य जिह्वामुल्लिख्य दंतकाष्ठं प्रक्षालिते पुरः शुद्ध
देशे त्यक्त्वा मुखं मूलेन प्रक्षाल्याचम्य नद्यादितीरं गत्वा स्ना

नेकुर्यात् इतिप्रातःकृत्यविधिः अथस्नानविधिः अथशौच
विधिः ततोमृदंगृहीत्वाचशौचंगच्छतिसाधकः गत्वानैर्ऋ
त्यकोणेतुप्रकोनेजनवर्जिते. तृणास्तरितभूदेशेकुर्यान्मल
विसर्जनं तत्रगत्वासाधकेशोभूतानुत्सारयेज्जनः गच्छंतत्र
येयेदेवाःपिशाचायक्षराक्षसाः पितृभूतगणाःसर्वेंकरिष्ये
मलमोचनं अनेनैवपठित्वाचदत्वातालत्रयंशिवे. उत्तराभि
मुखोपविश्यवस्त्रेणाच्छादयेच्छिरःदक्षकर्णस्थब्रह्मसूत्रःसन्
कुर्यान्मलविमोचनं कृत्वामूत्रपुरीषेतुततोन्यत्रोपसंविश्य
तु मृदंत्रिधाविभागस्थांभागमेकंप्रगृह्यच स्थूलामलकमा

पू:
२३

नेनगृहीत्वामृदमाददात् शौचंकार्यंप्रयत्नेनगंधलेपक्षयाव
धि एकालिंगेगुदेतिस्रः दशभिर्वामपाणिना उभयोःकरयोः
सप्तपादयोस्तिस्तिरुच्यते इतिशौचविधिः अथदंतधावनवि
धिः ह्रींबीजेनगंडूषान्त्रयःकुर्यात्ततःपरं अनिषिधदिने
काष्ठंदंतान्संशोधयेच्छिवे षष्ठ्यमाप्रतिपद्देविदंतधावेवि
वर्जिताः॥हतचंपकजंबूकअपामार्गादिवाप्रिये अष्टादशां
द्वादशांवाअंगुलंप्राप्यंतेहरेत्॥ आयुर्बलंयशोवर्चःप्रजां
पशुधनानिच ब्रह्मप्रज्ञांचमेधांवत्वंनोदेहिवनस्पते॥ अने
नवनस्पतिप्रार्थ्यगृहीत्वादंतधावनं ॐऐंह्रींतडिँस्वाहे
ते॰

तिमंत्रेणछेदयेच्छिवे ॐ क्लीं कामदेवाय सर्वजनप्रियाय न
मः इतिमंत्रेणदंतान्संशोध्य वाग्भवेनजिह्वामुल्लिखेद्दं
तकाष्ठंतत्क्षालयेत् नैर्ऋत्यांशुद्धदेशेतद्दंतकाष्ठंचनिक्षि
पेत् मुखंमूलेनप्रक्षाल्यत्रिराचम्यपरेशिवे ॐ प्रथमकूटं
आत्मतत्वायस्वाहा ॐ द्वितीयकूटंविद्यातत्वायस्वाहा ॐ तृतीयकू
टंशिवतत्वायस्वाहा इतित्रिराचम्य ॥ देवस्यानातिर्माल्यम
पमार्ज्यनदीस्नानंव्रजेत्ततः ॥ इतिदंतधावनविधिः ततस्ती
र्थंहरिः कटिशौचंविधायमलापकर्षणस्नानंविधाय
॥ स्वशाखोक्तविधिनावैदिकंस्नानंचविधाय नाभिमात्रेज

अस्मत्संप्रदाये माध्यंदिनीशाखायां स्वर्वेदोयजुर्वेदः सूत्रंकात्यायनं ॥

पृ: २५ 24

लेस्पित्वा पश्चान्मृत्कां च शोषयेत् यथा ॥ अस्त्रेणाभिमन्त्र्य संमेऽमृते
नैव शोषयेच्छिवे शिवामन्त्रेण संशोध्य मूलेनाभिचमन्त्रये
त् जले चैवैकं द्वादशभानि क्षिपेदस्त्रमुच्चरन् पङ्कं मूर्धादिना
भ्यन्तं पठन्मूलं विलेपयेत् शेषं पादादिनाभ्यन्तं पठन्मूलं वि
लेपयेत् ततो नाभिमात्रोदके गत्वा संकल्पं कारयेद्यतः
ॐ अद्य तावत्तिथावद्याऽमुकमासस्याऽमुकपक्षस्य तिथा
वमुकायां अमुकदिनेऽमुकशर्माऽहं श्रीपरदेवताप्रीत्यर्थं
तांत्रिकस्नानमहं करिष्ये इति कुशाक्षतमिश्रजलेनार्घपा
त्रादिना संकल्प्य ॥ प्राणायामं कृत्वा स्वमूलऋष्यादिकरष

ङेगन्धासांश्चकृत्वा स्वपुरतोजलेहस्तमात्रेचतुरस्रंतीर्थंप
रिकल्प्य ॐब्रह्मांडोदरतीर्थानिकरैःस्पृष्टानितेरवे तेन
सत्येनदेवेशतीर्थान्देहिदिवाकर इतिसूर्यात्तीर्थंप्रार्थ्य
क्रोंइत्यंकुशमुद्रयासूर्यमंडलंभित्वा ॐगंगेचयमुनेचैव
गोदावरिसरस्वति नर्मदेसिंधुकावेरिजलेस्मिन्सन्निधिंकु
रु आवाहयामिवोदेविस्नानार्थमिहसुंदरि एहिगंगेनम
स्तुभ्यंसर्वतीर्थसमन्विते इतिसूर्यमंडलात्तीर्थमाकृष्य
पुरःकल्पिततीर्थेसंयोज्य पुनःसूर्यमंडलादेव ॐऐंह्रींश्री
क्रांह्रींह्रूंह्रैंह्रौंह्रःसर्वानंदमयेतीर्थशक्तेपरेहिस्वाहा

पृ॰ २५ 25

इतितीर्थशक्तिमावाह्य तस्मिंस्तीर्थमंडलेतांध्यायेत् ॐसर्वा
नेदमयीमशेषदुरितध्वंसांमृगांकप्रभां अह्नोवोर्धकरद्वये
नदधतींपाशांसृणिंचक्रमात् दोर्भ्यांवामसुपूर्णहेमकलशं
स्रुक्कान्तमालांवरांगंगांसिंधुसरिद्द्वयादिसहितांश्रीतीर्थ
शक्तिंभजे इतिध्यात्वा ॐनमोभगवतिश्रेवेश्वबालिकेमहा
मालिनिएह्येहिभगवतिसशेषतीर्थालवालेह्रींश्रींशिव
जटाधिरूढेगंगेगंगंगांबिकेस्वाहा इतिमंत्रेणसमयाभिमंत्र्य
ह्रीमित्यालोक्य वमितिधेनुमुद्रयामृतीकृत्य ॐऐंह्रींश्रींप्र
थमकूटंआत्मतत्वात्मनेनमः ॐऐंह्रींश्रींद्वितीयकूटं वि

यात्तत्वात्मनेनमः ॐऐंह्रींश्रींतृतीयकूटं शिवतत्वात्मनेन
मः इतितत्वत्रयंजलेविन्यस्य तत्रश्रीचक्रंविभाव्य हृदयक
मलाद्देवीमावाह्य षडंगेनसकलीकृत्य ॐह्रींश्रींत्रिपुरेदे
विपरिवारसमन्विते त्वांस्नापयामितीर्थेस्मिन्मंत्रमूर्तेनमो
स्तुते इतिमंत्रेण तांसावरणांस्नपयित्वा योनिमुद्रयामूले
नतज्जलमष्टधाभिमंत्र्य तत्रदेवतास्मरणपूर्वकंत्रिर्निमज्यो
न्मज्य कुंभमुद्रयामूलविद्ययास्वशिरसित्रिरभिषिच्य मूले
नदेवींत्रिःसंतर्प्य देवींस्वहृदिसमानीय ॐऐंह्रींश्रींप्रथम
कूटंस्वात्मतत्वंशोधयामिस्वाहा ॐऐंह्रींश्रींद्वितीयकूटंविद्या

तत्त्वंशोधयामिस्वाहा ॐऐंह्रींश्रींतृतीयकूटंशिवतत्त्वंशोधय
पू: यामिस्वाहा इतित्रिराचम्यतीरमाहृत्य धौतेवाससीपरिधाय
२८ ॐज्रंमः इतिमंत्रेण त्रिपुंड्रकमूर्ध्वपुंड्रकंवातिलकंविधाय
26 वैदिकसंध्यांसमाप्य तांत्रिकीमारभेत् इतिस्नानविधिः ॥ अ
थसंध्या ऊर्ध्वश्रुत्यनुसारेणशिवानंदेनयोगिना पूर्णाभिषे
कयुक्तानांमहासंध्याविधीयते संध्याचतुर्विधाज्ञेयाबाला
कौमारयौवना प्रौढाचनिष्कला ... चेतिसंध्यादेविप्रकीर्ति
ता प्रातःकालेमहादेविविद्यावागीश्वरीतथा कामेश्वरीच
मध्याह्नेसायाह्नेत्रिपुरेश्वरी अर्धरात्रेमहादेवि महा ... त्रिपुर

सुंदरी आश्लिष्य समाविश्य पादौ हस्तौ प्रक्षाल्याचमेत्
ऐं प्रथमकूटं आत्मतत्त्वाय स्वाहा क्लीं द्वितीयकूटं विद्यातत्त्वा
य स्वाहा सौः तृतीयकूटं शिवतत्त्वाय स्वाहा इति त्रिराचम्य ॐ
मणिधरि वज्रिणि सर्ववशंकरिणि रक्ष रक्ष हुं फट् स्वाहा महाप्रतिसरे
इति मंत्रेण शिखां बद्ध्वा तत्र विधिवदाचम्य मूलेन त्रिखंडो
बद्ध्वा प्राणायामं ऋष्यादिकरषडंगन्यासान् विधाय सौः सं कल्कीं
अस्त्राय फट् इत्यस्त्रमंत्रेण आत्मनश्चतुर्दिक्षु जलं क्षिप्त्वा व
ह्निप्राकारं ध्यात्वा ऐं मणिधरि वज्रिणि महाप्रतिसरे रक्ष रक्ष
हुं फट् स्वाहा इति मंत्रेण शिखां बद्ध्वा ॐ ह्रीं नमः इति मंत्रेण
क्रौं

पू॰
२२

यज्ञोपवीतेदक्षभुजेनिधाय स्वगुरतोधेनुमुद्रया तथैवर
वितंतीर्थंजलममृतीकृत्य मूलेनाष्टधाभिमंत्र्यतेनजले
ननत्रमुद्रया ॐऐंह्रींश्रींअंनमः ॐऐंह्रींश्रींआंनमः ॐऐं
ह्रींश्रींइंनमः ॐऐंह्रींश्रींईंनमः ॐऐंह्रींश्रींउंनमः ॐऐंह्रीं
श्रींऊंनमः ॐऐंह्रींश्रींऋंनमः ॐऐंह्रींश्रींॠंनमः ॐऐंह्रींश्रीं
लृंनमः ॐऐंह्रींश्रींॡंनमः ॐऐंह्रींश्रींएंनमः ॐऐंह्रींश्रींऐं
नमः ॐऐंह्रींश्रींओंनमः ॐऐंह्रींश्रींऔंनमः ॐऐंह्रींश्रींअंन
मः ॐऐंह्रींश्रींअःनमः ॐऐंह्रींश्रींकंनमः ॐऐंह्रींश्रींखंनमः
ॐऐंह्रींश्रींगंनमः ॐऐंह्रींश्रींघंनमः ॐऐंह्रींश्रींङंनमः ॐ

ऐं ह्रीं श्रीं चं नमः ॐ ऐं ह्रीं श्रीं छं नमः ॐ ऐं ह्रीं श्रीं जं नमः ॐ ऐं
ह्रीं श्रीं झं नमः ॐ ऐं ह्रीं श्रीं ञं नमः ॐ ऐं ह्रीं श्रीं टं नमः ॐ ऐं ह्रीं
श्रीं ठं नमः ॐ ऐं ह्रीं श्रीं डं नमः ॐ ऐं ह्रीं श्रीं ढं नमः ॐ ऐं ह्रीं श्रीं
णं नमः ॐ ऐं ह्रीं श्रीं तं नमः ॐ ऐं ह्रीं श्रीं थं नमः ॐ ऐं ह्रीं श्रीं दं
नमः ॐ ऐं ह्रीं श्रीं धं नमः ॐ ऐं ह्रीं श्रीं नं नमः ॐ ऐं ह्रीं श्रीं पं नमः
ॐ ऐं ह्रीं श्रीं फं नमः ॐ ऐं ह्रीं श्रीं बं नमः ॐ ऐं ह्रीं श्रीं भं नमः ॐ
ऐं ह्रीं श्रीं मं नमः ॐ ऐं ह्रीं श्रीं यं नमः ॐ ऐं ह्रीं श्रीं रं नमः ॐ ऐं ह्रीं
श्रीं लं नमः ॐ ऐं ह्रीं श्रीं वं नमः ॐ ऐं ह्रीं श्रीं शं नमः ॐ ऐं ह्रीं श्रीं
षं नमः ॐ ऐं ह्रीं श्रीं सं नमः ॐ ऐं ह्रीं श्रीं हं नमः ॐ ऐं ह्रीं श्रीं लं

पू॰ २८

नमः ॐ ऐं ह्रीं श्रीं नमः इति मातृकान्यासैः स्वशिरः प्रोक्ष्य मू
लेन च त्रिः प्रोक्ष्य दक्षहस्तेन जलमादाय वामहस्तेनाच्छाद्य
लं वं रं यं हं इति पांचभौतिकैर्मंत्रैः सप्तवारमभिमंत्र्य मूलेन
च त्रिरभिमंत्र्य तज्जलबिंदुभिर्वामहस्तकृततत्त्वमुद्रया मू
लेन स्वशिरः त्रिः प्रोक्ष्य ऽवशिष्टं जलं वामहस्तेन निधाय तेजो
रूपं तज्जलमिडयाकृष्य स्वदेहान्तःस्थितं सकलकल्मषं प्रक्षा
ल्य तज्जलं कृष्णवर्णं पिंगलया वहिर्निर्गतं मत्वा पुनर्दक्ष
हस्ते कृत्वा स्ववामभागे ज्वलद्वज्रशिलां ध्यात्वा ॐ श्रीं पशु
हुं फट् इति पाशुपतास्त्रमंत्रेण तस्यां शिलायामास्फालये दिदम्
वमर्षणं कृत्वा

28

ह्स्रौः प्रक्षाल्य मूलेनजलमादाय प्रवहन्नाड्या सहस्रदल ५८
परमामृतेनैकीभूतं विभाव्य निर्गमय्य तेनजलेनं अमृ
तमालिन्यैस्वाहा इतिमंत्रेण ऊँपैः स्वशिरसि प्रोक्ष्य ऊँपैं
ह्रींश्रींप्रथमकूटं आत्मतत्त्वं शोधयामिस्वाहा ऊँपैंह्रींश्रीं
द्वितीयकूटं विद्यातत्त्वं शोधयामिस्वाहा ऊँपैंह्रींश्रींतृती
यकूटं शिवतत्त्वं शोधयामिस्वाहा इतित्रिराचम्य एतद्वैप
रीत्येनचत्रिराचम्य ऊँपैंह्रींश्रींसर्वंमूलंसर्वतत्त्वंशोधया
मिस्वाहा इतिचत्रिराचम्य इतिनवधाजलेनाचम्य पीतां
पीतांबरांपीतस्रग्विभूषानुलेपनां तडित्कोटिसमाभा

पू॰
२५
29

सं बालामलसमुज्वलां इतिध्यानः सध्या जलमंजलिनार्घ्या
योन्याय ॐ ऐं ह्रीं श्रीं ऐं प्रथमे वागीश्वरि त्रिपुरे देवि विद्महे
क्लीं द्वितीये कामेश्वरि धीमहि सौः तृतीये तन्नः शक्तिः प्रचो
दयात् श्रीमहात्रिपुरसुंदरी श्रीपादुकायै पघार्घ्यः स्वाहा
इतित्रिरर्घ्यं दत्वा ॐ ह्रां ह्रीं हंसः श्रीसूर्यपद्मतेर्घ्यः स्वाहा नेत्र
मारे श्रीविद्यायांतु ऐं ह्रीं श्रीं ह्रां ह्रीं सः मार्तंडभैरवाय प्रका
शशक्तिसहिताय ग्रहगणेन नक्षत्रयोगकरणपरिवार
सहिताय इदमर्घ्यं स्वाहा इतिसूर्यायार्घ्यं दत्वा मूलेन देवी
त्रिः संतर्प्य श्रीसूर्यं च त्रिः संतर्प्य श्रीः संध्यावतविधाने

याबालकौमारयौवना प्रौढाचेतिमहादेविस्वेस्वेकार्या
न्वहर्निशम् प्रातःकालेमहादेविविद्यावागीश्वरीमता
कामेश्वरीचमध्याह्नेसायंत्रिपुरभैरवी अर्धरात्रेमहादे
वित्तेयात्रिपुरसुंदरी तद्विधिर्यथा प्रागवदाचम्य मूला
धारेप्रथमवाग्भवकूटंतडित्कोटिसमप्रभंमूलाधारा
दिब्रह्मरंध्रांतंसंचिंत्य ततेजः सुषुम्णावर्त्मनाब्रह्मरंध्रेनी
त्वाब्रह्मत्रासाधुना आकाशस्थवह्निमंडलेसमावाह्य तते
जसोद्भूतांवागीश्वरींध्यायेत् यथा अस्यश्रीवाग्भवाधिष्ठा
तृवागीश्वरीप्रातःसंध्यामंत्रस्य ब्रह्माऋषिः पंक्तिश्छंदः

पू॰ श्रीवागीश्वरीदेवता ऐंबीजं सौःशक्तिः क्लींकीलकं सम
स्तपापदुरितार्तिनिवारणार्थेजपेविनियोगः इतिकृतांज
३॰ लिःस्वध्यान्यसेत् ब्रह्मऋषयेनमः शिरसि पंक्तिछंदसे
30 नमो मुखे श्रीवागीश्वरीदेवतायैनमो हृदि ऐंबीजायन
मो गुह्ये सौःशक्तयेनमः पादयोः क्लींकीलकायनमो
नाभौ समस्तपापदुरितार्तिनिवारणार्थेजपेविनियोगः
सर्वांगेषु इत्यृष्यादिन्यासः अथकरन्यासः कें अंगुष्ठा
भ्यांनमः ऐं· तर्जनीभ्यांस्वाहा ई मध्यमाभ्यांवौषट् ल
अनामिकाभ्यांहुं ह्रींकनिष्ठिकाभ्यांवषट् कें· करतलक

ऽस्त्राभ्यांफट् इतिकरन्यासः अथषडंगन्यासः कें ह
दयायनमः ऐं शिरसेस्वाहा ईं शिखायैवौषट् लें
कवचायहुं ह्रीं नेत्रत्रयायवषट् कें अस्त्रायफट् इति
षडंगन्यासः अथध्यानम् पीनांपीनांवरांपीनस्तनींरक्त
गात्रानुलेपनाम् तडित्कोटिसमाभासांबालामहृत्स्तर
स्वलाम् वामभवांवामभवोद्भूतांत्रीनत्रणांसस्मितांस्मरेत्
इतिश्राकाशस्थवह्निमंडलेध्यात्वा थें प्रथमकूटसुन्दा
र्यै त्रिपुरावागीश्वरीश्रीपादुकांपूजयामिनमः इतिगं
धपुष्पाक्षतैस्त्रिःसंपूज्य पुनः थें वागीश्वरीश्रीपादु

पूं
३१
31

क्लीं सृजयामि नमः इति मंत्रेण त्रिः संतर्प्य ततः ऐंक्लींसौं
लह्रीं त्रिपुरे देवि विद्महे वागीश्वरि धीमहि तन्नो मुक्तिः
प्रचोदयात् इत्यनया गायत्र्या त्रिरर्घ्यं श्रीसूर्याभिमुखं ज
लांजलिना दत्वा यथाशक्ति वाग्भवबीजे गायत्रीं मूल
मंगन्यासादिसहितं जपेत् श्रीगुरुं नत्वा इति प्रातःसं
ध्या॥ मूलदेवीं वागीश्वरीरूपां स्वहृदि मूलाधारे च विसृ
जेत् प्रथम मध्याह्नसंध्या मध्याह्ने अनाहतचक्रे मूल
विद्यायाः कामराजकूटं रक्तवर्णं ध्यायन् तत्तेजः सुषु
म्नामार्गेण बहिर्नासाध्वना निःसार्य सूर्यमंडले समा

वाह्ये नद्वृत्तो कामेश्वरीं ध्यायेत् यथा अस्य श्रीकामे
श्वरीमहाविद्यागायत्रीमंत्रस्य विश्वऋषिः पंक्तिश्छंदः
श्रीकामेश्वरीदेवता क्लींबीजं ऐंशक्तिः सौःकीलकं म
मस्तमलविशोधनेजपेविनियोगः इतिकृतांजलिः सृ
त्वान्यसेत् विश्वऋषयेनमः शिरसि पंक्तिछन्दसेनमो
मुखे श्रीकामेश्वरीदेवतायैनमो हृदि क्लींबीजायनमो
गुह्ये ऐंशक्तयेनमः पादयोः सौःकीलकायनमो नाभौ
ममसमस्तमलविशोधनेजपेविनियोगः हंस्रंगुष्ठाभ्यांन
मः ऐंतर्जनीभ्यांस्वाहा कंमध्यमाभ्यांवौषट् हस्रना

मिकाभ्यांऐं लेंकनिष्ठिकाभ्यांवषट् ह्रींकरतलकरपृष्ठा
पू॰ भ्यांफट् इतिकरन्यासः अथषडंगन्यासः ह्रें हृदयायनमः
३२ सेंशिरसेस्वाहा कोंशिखायैवौषट् ह्रैंकवचायहुं लेंनेत्र
32 त्रयायवषट् ह्रींअस्त्रायफट् इतिषडंगन्यासः अथध्यानं
रक्तांसरक्तांबरभूषणाढ्यांपाशांकुशाभीतिवरान्दधा
नाम् शुचिस्मितामुद्भटयौवनाढ्यांकामेश्वरींनौमित्रिने
त्रयुक्ताम् इतिध्यात्वा कामराजमुच्चार्यश्रीत्रिपुराकामे
श्वरीश्रीपादुकांपूजयामिनमः इतित्रिस्सप्तजप अनेनैव
सूर्याभिमुखंजलांजलिनात्रिरर्घ्यंदत्वा ॐऐंह्रींश्रींक्लीं

ह्रैं सैं कैं ह्रैं लैं ह्रीं त्रिपुरेदेवि विद्महे कामेश्वरि धीमहि त
न्नः क्लिन्ने प्रचोदयात् इति गायत्री कामराजेन च यथा श
क्तिजप्या मूलेन च जप्या प्रणम्य मूलदेवी कामेश्वरी व
स्वलादि विसर्जेदिति मध्याह्न संध्या प्रथमायं मायमा
त्ता चक्रे चन्द्रमंडले शक्तिबीजं शुद्धस्फटिकसंकाशं ब्रह्म
रंध्रस्थ पूर्णेंदु मंडल पर्यंतं ध्यात्वा वहन्ता मा पुटेना का
शस्थ सोममंडले समावाह्य तदुद्भूताममृतेश्वरीं ध्याये
त् यथा अस्य श्रीअमृतेश्वरीमंत्रस्य महेश्वरऋषिः
पंक्तिछंदः श्रीअमृतेश्वरीदेवता सौः बीजं ब्लौं शक्तिः

पू: ३३ पैंकीलकं समस्तदुःस्वमनाशनार्थे जपे विनियोगः इति
कृतांजलिः स्मरन्वान्यसेत् महेश्वरऋषये नमः शिरसि
पंक्तिछंदसे नमो मुखे अमरेश्वरीदेवतायै नमो हृदि
सौंबीजाय नमो गुह्ये क्लींशक्तये नमः पादयोः क्लींकी
लकाय नमो नाभौ समस्तदुःस्वमनाशनार्थे जपे विनि
योगः सर्वांगेषु संअंगुष्ठाभ्यां नमः कं तर्जनीभ्यां स्वाहा
लं मध्यमाभ्यां वौषट् ह्रीं अनामिकाभ्यां हुं सं कं कनिष्ठि
काभ्यां वषट् लं ह्रीं करतलकरपृष्ठाभ्यां फट् इति करन्या
सः अथ षडंगन्यासः सं हृदयाय नमः कं शिरसे स्वाहा

लेंशिखायैवौषट् ह्रींकवचायहुं संकेंनेत्रत्रयायवौषट्
लेंह्रींअस्त्रायफट् इतिषडंगन्यासः अथध्याने शुक्लांशु
कांबरालेपस्रग्विभूषाविभूषिताम् जटाजूटधरांनेत्र
त्रयोद्भासिमुखांबुजाम् ईषत्स्फुरितदंष्ट्रांचभैरवीरूप
माश्रिताम् जटावलितसंकीर्णांलंबमानपयोधराम्
पाशांकुशौपुस्तकंचस्फाटिकाक्षस्रजंकरैः दधानांशक्ति
बीजोत्थांपूर्णेन्दोर्मंडलेस्थिताम् ध्यायेदायोंपरांशक्ति
मनेनामस्तेश्वरीम् इतिध्यात्वा मूले तृतीयकूटशुश्रा
यै त्रिपुरामस्तेश्वरीश्रीपादुकांपूजयामिनमः इतिगं

पू: ३४

35

पादिनाप्रपूज्य पुनःस्तनीयं त्रिपुरां(म)स्तनेश्वरीं तर्पयामि न
मः इति त्रिर्जलांजलिनार्घ्यं दत्वा सौः त्रिपुरेदेवि विद्महे श
क्लीश्वरि धीमहि तन्नोस्तने प्रचोदयात् इति गायत्रीं मूलं
च यथाशक्ति जप्त्वा जपं समर्प्य सूर्यमंडलाद्देवीं हृदि
पद्ममध्ये च विसर्जेदिति सायंसंध्याविधिः अथ तुरीया स
र्ध्यात्रे देवीध्याने विना तारामंडले सहस्रदलकमले प्रा
णायामादिना साचमनपर्यंते एवं विहिताय ब्रह्मरंध्रेतु
रीयबीजं मूलविद्यात्रयोदशाक्षररूपं पद्मरागसमप्र
भं वहन्नासापुटेन तारामंडले संयोज्य तदुद्भूतो भगवती

ध्यायन् तुरीयमुद्रायै श्रीमहात्रिपुरसुंदरीश्रीपादुकां
पूजयामि नमः इति गंधादिना संपूज्य पुनस्तमेव मुद्रा
यै ऐं क त्रिपुरे देवि विद्महे क्लीं हसकहलह्रीं कामेश्वरि
धीमहि सौः स तन्नः शक्तिः प्रचोदयात् इति गायत्र्या त्रि
र्घं दत्वा मूलेनाचयथाशक्तिजप्त्वा जपं समर्प्य देवीं स्तु
त्वा सहस्रारे विसृज्य कामकलारूपं स्वात्मानं विभाव्य
श्रीगुरुं प्रणमेदिति संध्यावन्दनम् मूलाधारे प्रथमं कू
टं मूलादित्रिवलयं भ्रान्तं ध्यात्वा आकाशस्थवह्निमंडले समा
वाह्य तत्र वालां वागीश्वरीं ध्यात्वा ऐं त्रिपुरे देवि विद्महे

वागीश्वरि धीमहि तन्नोशुक्तिःप्रचोदयात् अनयामूल
पू: देव्यैत्रिरर्घ्यंदत्वा त्रिःसंतर्प्यश्रीगुरुंप्रणम्य प्राणायाम
३५ ऋष्यादिकरषडंगन्यासपूर्वकंपूर्वोक्तांमूलगायत्रींजप्त्वा
35 प्रातःवागीश्वरीगायत्रीमपिजप्त्वा प्रथमकूटमपिजप्त्वा
मूलमपियथाशक्तिजप्त्वा प्राणायामादिनाजपंदेव्यैस
मर्प्य सूर्यमंडलान्मूलदेवीमुखादिवह्निमंडलाद्वावागी
श्वरींस्वकूटसहितांमूलाधारेविसृज्य श्रीगुरुंप्रणम्य इ
तिप्रातःसंध्याविधिः अथमध्याह्नसंध्या प्रातःप्राणाया
मादिसूर्यतर्पणांतंप्रातः संध्यावदेवविधाय बीजमं

ध्यां कुर्यात् तत्र मध्याह्ने श्रुतानाहतत्वके मूलविद्याया द्विती
यकूटं रक्तवर्णं ध्यायेत् स्वतेजो वह्निः सूर्यमंडले समावाह्य
तत्र कामेश्वरीं यौवनरूपां ध्यात्वा रक्तांबरकांचनभूष
णाढ्यां पाशांकुशाभीतिवरान्दधानां शुचिस्मितां सुन्द
रीं यौवनाढ्यां कामेश्वरीं संस्मरत त्रिनेत्रां इति मध्याह्ने ध्या
त्वा क्लीं त्रिपुरेदेवि विद्महे कामेश्वरि धीमहि तन्नः क्लिन्ना
प्रचोदयात् इत्यनया देव्यै अर्घ्यं दत्वा एतां यथाशक्ति जप्त्वा
तुरीयां मूलगायत्रीमपि विजप्त्वा द्वितीयकूटं मूलमपि
यथाशक्ति जप्त्वा प्राणायामादिपूर्वकं जपं समर्प्य प्रणम्य

पू॰ ३८ मलदेवीकामेश्वरीवस्वरूपादिविसृज्य श्रीगुरुंप्रणम्य इ
तिमध्याह्नसंध्या अथसायंसंध्या तत्रप्राणायामादिसूर्य
तर्पणांतेप्रातःसंध्यावदेवविधाय वीजसंध्यांकुर्यात् त
त्रसायंप्राक्तावत्कूमूलविद्यायाः तृतीयंकूटंशुद्धस्फटिक
निर्मलेप्याकाशस्थसोममंडलेसमावाह्य तत्रश्मशानेश्व
रीश्रीशंभोध्यात्वा शुक्लांशुक्लांवरालेपस्रगाविभूषाविभूषि
तां जटाजूटधरांनेत्रत्रयोद्भासिमुखांबुजां ईषत्स्फटिन
दंष्ट्रांचभैरवीरूपमास्थितां जरापलितसंकीर्णालंबमा
नपयोधरां पाशांकुशौपुस्तकंचस्फटिकाक्षस्रजंकरैः

36

द्ध्यानंशक्तिबीजोत्थांहृद्योदोमंडलेस्थितां इतिसायं
सौः त्रिपुरेदेवि विद्महे शक्तीश्वरि धीमहि तन्नोम्बेप्र
चोदयात् इत्यनयार्घ्यंदत्वा तुरीयगायत्रीमेनांगायत्री
च यथाशक्तिजप्त्वातृतीयकूटंमूलविद्यांचजप्त्वा प्राणायामा
दिपूर्वकंजपंसमर्प्य सोममंडलान्तस्थदेवीहृदि स्मर
णेश्वरीचिप्राप्ताचक्रेसमानीयश्रीगुरुंप्रणम्य इतिसायं
संध्या अथार्धरात्रसंध्या चक्रमंडलेदेवीध्यानंविना प्रा
णायामाद्याचमनपर्यन्तेपूर्ववद्विधाय सहस्रारेतुरीय
बीजंमूलविद्यात्रयोदशाक्षरस्वरूपंपद्मरागप्रभंध्यात्वा

पृं ३२
37

वह्निस्थानमंडलेसमावाह्य तत्रभगवतींयथोक्तरूपांध्या
त्वा तुरीयवीजेनसंहृत्य तुरीयगायत्र्या तत्रमूलदेव्यैअर्घ्यं
दत्वा त्रयोदशाक्षररूपंतुरीयकूटंजप्त्वा तुरीयगायत्रीं
मूलविद्यांयथाशक्तिजप्त्वाजपंसमर्प्य स्वदेवीहृदिसंहृ
त्यैवतुरीयदेवींविसृज्य श्रीगुरुंप्रणम्य कामकलारू
पमात्मानंध्यायेत् इतितुरीयसंध्याविधिः एतत्संध्याच
तुष्टयमावश्यकंकार्यं अथवाप्रातरेवचतुष्टयं कार्यं
केवलैवप्रातः संध्याकार्यातांनत्यजेदितिशिवस्यासन मग॰
म् स्नानेसंध्यांचसंलोप्यजपेदष्टोत्तरंप्राते इतितंत्रराज

संक्षिप्त ˆ संक्षेप ˆ

वचनात् मूलमंत्रमिति शेषः॥ इति संध्याविधिः अथ तर्पणं
इत्थं संध्याकरणानंतरं वैदिकं तर्पणं समाप्य तांत्रिकत
र्पणमारभेत् तत्र प्राणायामादिपूर्वकं स्वपुरतो जलेसू
र्वैवत्तीर्थमावाह्य वमिति धेनुमुद्रयामृतीकृत्य मूलेना
ष्टवारमभिमंत्र्य तत्र श्रीचक्रं विभाव्य तत्र देवीमावाह्य
मनसा सर्वोपचारैः संपूज्य ॐ ऐं ह्रीं श्रीं श्रीमहात्रिपुरसुं
दरीश्रीपादुकां तर्पयामि नमः इति यथाशक्ति संतर्प्य
ॐ ऐं ह्रीं श्रीं श्रीमहात्रिपुरसुंदर्या आवरणदेवतास्तर्पया
मि नमः इति संतर्प्य अथ तर्पणविधिः॥ पूर्ववदाचमेद्

पू॰ ३८

विशाणायामत्रयेपरं ऋष्यादिकरषडंगानिन्यासंकुर्या
त्ततःपरं सर्ववज्रौघंमावाह्यमूलेनास्त्रेणविभाव्यच त
स्मिन्जलेसाधकेशःयंत्रेध्यात्वा ततःशिवे तस्मिंदेवीस
मावाह्यस्वहृदयात्सपरिवारकः षडंगेनसकलीं परमीकृ
त्य कुंडलिनीप्रयोगेनास्त्रेणपरिवारदेवतास्तर्पयेच्च
था कामेश्वरीनित्यातर्प्पतो भगमालिनीनित्यातर्प्पतो
नित्यक्लिन्नानित्यातर्प्पतो भीरुंडानित्यातर्प्पतो वह्निवा
सिनीतर्प्पतो नित्यातर्प्पतो वज्रेश्वरीनित्यातर्प्पतो शि
वदूतीनित्यातर्प्पतो त्वरितानित्यातर्प्पतो कुलसुंदरी

नित्यास्तर्प्पयन्तां नित्यानित्यास्तर्प्पयन्तां नीलपताकानित्यास्तर्प्प
यन्तां विजयानित्यास्तर्प्पयन्तां सर्वमंगलानित्यास्तर्प्पयन्तां ज्वाला
मुखीनित्यास्तर्प्पयन्तां चित्रानित्यास्तर्प्पयन्तां त्रिपुरानित्यास्तर्प्प महानित्यास्तर्प्पयन्तां २
यन्तां + परप्रकाशानंदनाथस्तर्प्पयन्तां परशिवानंदनाथस्तर्प्प
यन्तां परशक्तिदेव्यंबास्तर्प्पयन्तां कौलेश्वरानंदनाथांस्तर्प्पयन्तां
कुलेश्वरानंदनाथांस्तर्प्पयन्तां कामेश्वरीदेव्यंबास्तर्प्पयन्तां शुक्ला
देव्यंबास्तर्प्पयन्तां दिव्यौघगुरूंस्तर्प्पयन्तां भोगानंदनाथांस्तर्प्प
यन्तां क्लिन्नानंदनाथांस्तर्प्पयन्तां समयानंदनाथांस्तर्प्पयन्तां सह
जानंदनाथांस्तर्प्पयन्तां सिद्धौघगुरूंस्तर्प्पयन्तां गगनानंदना

पू॰ ३९
39

थस्तृप्यन्तो विश्वानंदनाथस्तृप्यन्तो विमलानंदनाथस्तृ
प्यन्तो सदानंदनाथस्तृप्यन्तो भुवनानंदनाथस्तृप्यन्तो ली
लानंदनाथस्तृप्यन्तो स्वात्मानंदनाथस्तृप्यन्तो प्रियानंदना
थस्तृप्यन्तो मानवौघगुरुस्तृप्यन्तो प्रकाशानंदनाथस्तृप्य
न्तो परमगुरुस्तृप्यन्तो परापरगुरुस्तृप्यन्तो परमेष्ठिगुरुः
स्तृप्यन्तो सर्वज्ञाहृदयशक्तिस्तृप्यन्तो नित्यतृप्ताशिरःशक्तिः
स्तृप्यन्तो अनादिबोधाशिखाशक्तिस्तृप्यन्तो स्वतंत्राताकव
चशक्तिस्तृप्यन्तो नित्यमलुप्तानेत्रशक्तिस्तृप्यन्तो अनंतास्त्र
शक्तिस्तृप्यन्तो अणिमासिद्धिस्तृप्यन्तो लघिमासिद्धिस्तृप्य

तो महिमासिद्धिंतर्प्पयतो ईशत्वसिद्धिंतर्प्पयतो वशित्व
सिद्धिंतर्प्पयतो प्राकाम्यसिद्धिंतर्प्पयतो भुक्तिसिद्धिंतर्प्पयतो
इच्छासिद्धिंतर्प्पयतो प्राप्तिसिद्धिंतर्प्पयतो सर्वकामप्रदासि
द्धिंतर्प्पयतो ब्राह्मीसिद्धिंतर्प्पयतो माहेश्वरीसिद्धिंतर्प्पयतो
कौमारींतर्प्पयतो वैष्णवींतर्प्पयतो वाराहींतर्प्पयतो इंद्राणीं
तर्प्पयतो चामुंडांतर्प्पयतो महालक्ष्मींतर्प्पयतो सर्वसंक्षो
भिणीमुद्रांतर्प्पयतो सर्वविद्राविणीमुद्रांतर्प्पयतो सर्वा
कर्षिणीमुद्रांतर्प्पयतो सर्ववशंकरीमुद्रांतर्प्पयतो सर्वो
न्मादिनीमुद्रांतर्प्पयतो सर्व महांकुशामुद्रांतर्प्पयतो सर्व खेचरी

पू॰ पं॰

५०

मुद्रात्स्पृप्यंतां बीजमुद्रात्स्पृप्यंतां योनिमुद्रात्स्पृप्यंतां त्रिखं
डामुद्रात्स्पृप्यंतां कामाकर्षिणीनित्याकलात्स्पृप्यंतां बुद्ध्या
कर्षिणीनित्याकलात्स्पृप्यंतां अहंकाराकर्षिणीनित्याल्त्स्पृ कला॰
प्यंतां शब्दाकर्षिणीनित्याकलात्स्पृप्यंतां स्पर्शाकर्षिणी
नित्याकलात्स्पृप्यंतां रूपाकर्षिणीनित्याकलात्स्पृप्यंतां र
साकर्षिणीनित्याकलात्स्पृप्यंतां गंधाकर्षिणीनित्याकला
त्स्पृप्यंतां चित्ताकर्षिणीनित्याकलात्स्पृप्यंतां धैर्याकर्षिणी
नित्याकलात्स्पृप्यंतां स्मृत्याकर्षिणीनित्याकलात्स्पृप्यंतां
नामाकर्षिणीनित्याकलात्स्पृप्यंतां बीजाकर्षिणीनित्या

कलास्तृप्यतां आत्माकर्षिणीनित्याकलास्तृप्यतां अमृता
कर्षिणीनित्याकलास्तृप्यतां शरीराकर्षिणीनित्याकला
स्तृप्यतां अनंगकुसुमास्तृप्यतां अनंगमेखलास्तृप्यतां अ
नंगमदनास्तृप्यतां अनंगमदनातुरास्तृप्यतां अनंगरेखा
स्तृप्यतां अनंगवेगिनीस्तृप्यतां अनंगांकुशास्तृप्यतां अनं
गमालिनीस्तृप्यतां सर्वसंक्षोभिणीशक्तिस्तृप्यतां सर्व
विद्राविणीशक्तिस्तृप्यतां सर्वाकर्षिणीशक्तिस्तृप्यतां सर्वा
ह्लादिनीशक्तिस्तृप्यतां सर्वसंमोहिनीशक्तिस्तृप्यतां सर्व
स्तंभिनीशक्तिस्तृप्यतां सर्वक्षोभिनीशक्तिस्तृप्यतां सर्वजं

पू॰ ५२

भिणीशक्तिस्त्वम्ं मर्ववशंकरीशक्तिस्त्वम्ं सर्वरंजि
नीशक्तिस्त्वम्ं सर्वोन्मादिनीशक्तिस्त्वम्ं सर्वार्थसाध
नीशक्तिस्त्वम्ं सर्वसंपत्प्रदायिनीशक्तिस्त्वम्ं सर्वमं
त्रमयीशक्तिस्त्वम्ं सर्वद्वंद्वक्षयंकरीशक्तिस्त्वम्ं स
र्वसिद्धिप्रदादेवीत्वम्ं सर्वसंपत्प्रदादेवीत्वम्ं सर्व
प्रियंकरीदेवीत्वम्ं सर्वमंगलकारिणीदेवीत्वम्ं स
र्वदुःखविमोचिनीदेवीत्वम्ं सर्वमृत्युप्रशमनीदेवीत्व
म्ं सर्वविघ्नविनाशिनीदेवीत्वम्ं सर्वांगसुंदरीदे
वीत्वम्ं सर्वसौभाग्यदायिनीदेवीत्वम्ं सर्वज्ञादेवी

देवीः
स्तृप्यंतां सर्वशक्तिस्तृप्यंतां सर्वैश्वर्यप्रदादेवीस्तृप्यंतां स
र्वज्ञानमयीदेवीस्तृप्यंतां सर्वव्याधिविनाशिनीदेवीस्तृ
प्यंतां सर्वाधारस्वरूपादेवीस्तृप्यंतां सर्वपापहरादेवी
स्तृप्यंतां सर्वानंदमयीदेवीस्तृप्यंतां सर्वरक्षास्वरूपिणी
देवीस्तृप्यंतां सर्वेप्सितफलप्रदादेवीस्तृप्यंतां वशिनी
वाग्देवतास्तृप्यंतां कामेश्वरीवाग्देवतास्तृप्यंतां मोहि
नीवाग्देवतास्तृप्यंतां विमलावाग्देवतास्तृप्यंतां अरुणा
वाग्देवतास्तृप्यंतां जयिनीवाग्देवतास्तृप्यंतां सर्वेश्वरी
वाग्देवतास्तृप्यंतां कौलिनीवाग्देवतास्तृप्यंतां जृंभण

पूं ५२

कामेश्वरबाणदेवतास्तृप्यतां जृंभणकामेश्वरीबाणदे
वतास्तृप्यतां मोहिनकामेश्वरचापदेवतास्तृप्यतां वशी
करणकामेश्वरपाशदेवतास्तृप्यतां वशीकरणकामे
श्वरीपाशदेवतास्तृप्यतां स्तंभनकामेश्वरांकुशदेवता
स्तृप्यतां स्तंभनकामेश्वर्यंकुशदेवतास्तृप्यतां इच्छाश
क्त्यात्मके रुद्रात्मशक्तिश्रीकामेश्वरीदेवीस्तृप्यतां ज्ञान
शक्त्यात्मके विष्ण्वात्मशक्तिश्रीवज्रेश्वरीदेवीस्तृप्यतां
क्रियाशक्त्यात्मके ब्रह्मशक्तिश्रीभगमालिनीदेवीस्तृप्य
तां परब्रह्मस्वरूपिणीमहाशक्तिस्तृप्यतां सर्वमंत्रेश्व

रीस्तृप्यतां सर्वविघ्नेश्वरीस्तृप्यतां सर्वपीठेश्वरीस्तृप्यतां
सर्ववीरेश्वरीस्तृप्यतां सर्वयोगेश्वरीस्तृप्यतां सर्ववागी
श्वरीस्तृप्यतां सर्वसिद्धीश्वरीस्तृप्यतां श्रीमहाषोडशीदेवी
तृप्यतां इंद्रशक्तिस्तृप्यतां अग्निशक्तिस्तृप्यतां यमशक्तिः
तृप्यतां नैरृतिशक्तिस्तृप्यतां वरुणशक्तिस्तृप्यतां वायु
शक्तिस्तृप्यतां सोमशक्तिस्तृप्यतां ईशानशक्तिस्तृप्यतां
ब्रह्मशक्तिस्तृप्यतां अनंतशक्तिस्तृप्यतां वज्रशक्तिस्तृप्य
तां शक्तिशक्तिस्तृप्यतां दंडशक्तिः खड्गशक्तिस्तृप्यतां
पाशशक्तिस्तृप्यतां ध्वजशक्तिस्तृप्यतां अंकुशशक्तिस्तृ

पू. ५३

त्मने गदाशक्तिंस्तर्पयामि त्रिशूलशक्तिंस्तर्पयामि पद्मशक्तिंस्तर्पयामि चक्रशक्तिंस्तर्पयामि इति परिवारदेवताः संतर्प्य पुनः प्राणायामऋष्यादिकरषडंगन्यासान्विधाय सं

संहारमुद्रया दिदेवीं विसर्जयेत् तीर्थानि स्वस्थाने विसर्जयेत् इति तर्पणविधिः ॐ ऐं ह्रीं श्रीं मूलं सायुधसवाहनसपरिवारसावरणश्रीमहात्रिपुरसुंदरीश्रीपादुकां तर्पयामि नमः इति संतर्प्य ऐशाने ऐं ह्रीं श्रीं श्रीमच्छ्रीगुरुकानंदनाथगुरुश्रीपादुकां तर्पयामि नमः इति त्रिः संतर्प्य वक्ष्ये ॐ ऐं ह्रीं श्रीं श्रीमच्छ्रीपरमगुरुश्रीपादुकां तर्पयामि नमः नैरऋत्ये

ॐ ऐं ह्रीं श्रीं श्रीमच्छ्रीपरमेष्ठिगुरुश्रीपादुकां तर्पयामि न
मः वायव्ये ॐ ऐं ह्रीं श्रीं श्रीमच्छ्रीपरमाचार्यगुरुश्रीपादु
कां तर्पयामि नमः इति संतर्प्य तीर्थं च स्वस्थाने विसृज्य
प्राणायामादि पूर्वकं जपं समर्प्य श्रीदेवीस्वरूपादि स्थापये
त् इति तर्पणम् ॐ वज्रोदके [illegible] हुं फट् स्वाहा ततः उत्थाय
मौनी मूलं स्मरन्यागगेहमागत्य जलादिना द्वारदेवताः
पूजयेत् ॐ ऐं ह्रीं श्रीं स्वधार्णववनष्यायनमः अं आं
इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं
झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं

पू॰ ४४

५५

मंह्रंलंहंः नवखंडविराजितायनवरत्नमयद्वीपायनमः
ॐऐंह्रींश्रीनंदनोद्यानायनमः ॐऐंह्रींश्रीस्वर्णप्राकाराय
नमः नद्वारस्यदक्षोत्तरपार्श्वयोरुपर्यधश्च ॐऐंह्रींश्री
गंगणपतयेनमः दक्षे ॐऐंह्रींश्रीक्षंक्षेत्रपालायनमः
वामे ॐऐंह्रींश्रीह्रांह्रारश्रियैनमः उपरि ॐऐंह्रींश्रीदंदे
हल्यैनमः अधः ॐऐंह्रींश्रीकदंववर्कननायनमः ॐऐं
ह्रींश्रीश्रीरत्नमंडपायनमः वाराह्यैनमः अभिसंपूज्य द्वा
रोर्ध्वपार्श्वयोर्दक्षिणे ॐऐंह्रींश्रीमांमहालक्ष्म्यैनमः वा
मे ॐऐंह्रींश्रीसांसरस्वत्यैनमः मध्ये ॐऐंह्रींश्रीडंडुर्गा

यैनमः प्रथः ॐ ऐं ह्रीं श्रीं द्वां द्वारश्रियैनमः द्वारस्यदक्ष
वामपार्श्वयोरधोर्ध्वः ॐ ऐं ह्रीं श्रीं शं शंखनिधिवसुधा
राभ्यांनमः ॐ ऐं ह्रीं श्रीं गं गणपतयेनमः ॐ ऐं ह्रीं श्रीं क्षें
क्षेत्रपालायनमः ॐ ऐं ह्रीं श्रीं मां मायायैनमः ॐ ऐं ह्रीं श्रीं
विं विह्लस्यैनमः ॐ ऐं ह्रीं श्रीं गं गंगायैनमः ॐ ऐं ह्रीं श्रीं
यं यमुनायैनमः ॐ ऐं ह्रीं श्रीं धां धात्र्यैनमः ॐ ऐं ह्रीं श्रीं विं
विधात्रेनमः ॐ ऐं ह्रीं श्रीं दें देहल्यैनमः द्वाराग्रे ॐ ऐं ह्रीं
श्रीं वं वरुणायनमः इतिपश्चिमद्वारे उत्तरे ऊर्ध्वशाखा
यांश्रावत्महालक्ष्मीमहासरस्वत्यादिदेहल्यंतेसंपूज्य

पूं
४५
45

मध्ये ॐ ऐं ह्रीं श्रीं वां वटुकाय नमः ॐ ऐं ह्रीं श्रीं द्वां द्वारश्रि
यै नमः ॐ ऐं ह्रीं श्रीं सं सोमाय नमः पूर्वद्वारे प्रागवन्महा
लक्ष्म्यादि देहल्यन्तं संपूज्य क्षं क्षेत्रपालाय नमः ॐ ऐं ह्रीं
श्रीं लं इन्द्राय नमः ॐ ऐं ह्रीं श्रीं क्लीं ग्लौं गणनाथाय न
मः ॐ ऐं ह्रीं श्रीं द्वां द्वारश्रियै नमः ततो दक्षिणद्वारा
ग्रे अर्घोदकेनाभ्युक्ष्य महालक्ष्मीसरस्वतीगणनाथ
द्वारश्रीशंखनिधिदेहल्यन्तं संपूज्य यं यमाय नमः इ
ति संपूज्य पुनः पश्चिमद्वारं गत्वा ॐ ऐं ह्रीं श्रीं रत्नसो
पानपंक्तये नमः तामाकृत्य ॐ नीलं तरंगमधिकृत्य

सुशोभमानानीलांशुकाभरणमाल्यविभूषणाढ्या
निद्रापुटेनभुवनानितिरोदधानाखड्गायुधाभगवती
परिपातुवास्मान् इतिश्रीतिरस्करिणींध्यात्वा ऐंनमो
भगवतिमाहेश्वरिपशुजनमनश्चक्षुस्तिरस्करणंकु
रुकुरुस्वाहा निरस्करिणीश्रीपादुकांपूजयामिनमः
इतिसंपूज्य ॐपालितेबहिर्विद्रायैःपरमैश्वर्यशोभि
ते पूर्वपश्चिमेद्वारेभवान्यामंदिरंमहत् इतिध्यात्वा
पश्चिमद्वारायमणिमंडपायनमः इतिध्यात्वापश्चि
मद्वाराग्रेकिंचिद्बहिस्तद्वार्यग्रेषु ॐऐंह्रींश्रींगौंगौरी

पू॰
५८
46

देवीश्रीपादुकांपूजयामितर्पयामिनमः ॐऐंह्रींश्रींलों
लोकयात्रीदेवीश्रीपादुकांपूजयामितर्पयामिनमः
ॐऐंह्रींश्रींवांवागीश्वरीदेवीश्रीपादुकांपूजयामित
र्पयामिनमः ॐऐंह्रींश्रींनवमलदैवौदिंदिव्यौघश्रीपा
दुकांपूजयामितर्पयामिनमः ॐऐंह्रींश्रींसिंसिद्धौ
घश्रीपादुकांपूजयामितर्पयामिनमः ॐऐंह्रींश्रींमा
मानवौघश्रीपादुकांपूजयामितर्पयामिनमः ततः
उत्तरद्वारंगत्वा तथैवाभ्युक्ष्य ॐऐंह्रींश्रींमांमायाश्री
पादुकांपूजयामितर्पयामिनमः ॐऐंह्रींश्रींडंडुंगी

श्रीपादुकांपूजयामितर्पयामिनमः ततःपुनःपूर्ववं
क्षेत्रपादिपूजनं ततःपूर्ववद्वारदक्षिणवामभागयोः
ॐऐंह्रींश्रींभंभद्रकालीश्रीपादुकांपूजयामितर्पयामि
नमः ॐऐंह्रींश्रींस्वंस्वस्तिश्रीपादुकांपूजयामितर्पया
मिनमः ततःपूर्ववत्क्षेत्रपार्यीतं ततोदक्षिणद्वारंगत्वा त
स्यदक्षिणवामभागयोः ॐऐंह्रींश्रींस्वांस्वाहाश्रीपादु
कांपूजयामितर्पयामिनमः ॐऐंह्रींश्रींशुंशुभंकरी
श्रीपादुकांपूजयामितर्पयामिनमः ततःपूर्ववत्क्षे
पादि ततःपश्चिमद्वारंगत्वा मंडपेसंपूज्य तालत्र

पूं ४८

47

यथपूर्वकं तत्तद्वारमाकल्य ततः सिद्धार्थाक्षतादिकुसु
मानि नाराचास्त्रयोगेन गृहीत्वा ओं ऐं ह्रीं श्रीं अपक्रामं
तु भूतानि पिशाचाः प्रेतगुह्यकाः ये चात्र निवसंत्यन्ये
देवता भुवि संस्थिताः अपसर्पंतु ते भूता भुवि संस्थि
ताः ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया इति श्र
स्त्रमंत्रमुच्चार्य मंडपांतः प्रोक्ष्य तस्मान्निर्गतानां विघ्ना
नां स्ववामांगमेकोचेन मार्गं दत्वा ओं पाघाडकारिणो
भूता भूमौ ये चांतरिक्षगाः दिविलोके स्थिता ये च ते न
श्यंतु शिवाज्ञया इत्यस्त्रेण वामपार्ष्णिघातानत्रयेणादि

ये भूता॰

व्यहृष्याच भौमान्तरिक्षदिव्यान्विघ्नानुत्सार्य वामपाद
पुरःसरं मंडपान्तः प्रविशेत् ततो मंडपान्तः प्रविश्य व
स्त्रेणद्वारमाच्छाद्य घंटावादनपूर्वकं पंचगव्यार्घ्यतोया
भ्याम स्त्रमंत्रेण मंडपान्तः प्रोक्ष्य नानावर्णरजश्चित्रैः पु
ष्पमाल्यवितानाद्यैर्मंडपमलंकृत्य लाजासिद्धार्थादिभि
र्भित्तिस्तंभादिकमरुणीकृत्य वेदीपरितश्चिरस्थायि
नः प्रदीपान्प्रज्वाल्य कालागर्वादिभिर्धूपयित्वा तदभा
वेनाहशंध्यात्वा ततो मंडपस्य नैर्ऋतकोणे ॐ ऐं ह्रीं श्रीं
वास्तुपुरुषाय नमः ॐ ऐं ह्रीं श्रीं वास्त्वधीशाय ब्रह्मणे

पू॰
५८

नमः ॐऐंह्रींश्रींईशानभागेकुलनाथायश्रीपादुकांपू
जयामिनमः ॐऐंह्रींश्रींरक्तवर्णद्वादशशक्तिसहित
श्रीदीपनाथायपादुकांपूजयामीतिदीपनाथंसंपूज्य
५८ अस्मिन्देवेदीपनाथनिर्विघ्नसिद्धिहेतवे श्रीचक्रक्रम
पूजार्थमनुज्ञांदीयतांमयि इतिदीपनाथाज्ञांप्राप्य
ततःपश्चिमादि ॐऐंह्रींश्रींद्वारदेवताचतुष्टयमध्य
हन्तर्यैवाश्रीपादुकांपूजयामिनमः ॐऐंह्रींश्रींसुंदर्यै
वाश्रीपादुकांपूजयामिनमः ॐऐंह्रींश्रींसमुखंवा
श्रीपादुकांपूजयामिनमः ॐऐंह्रींश्रींविरूपांवाश्रीपा

ड्कांपूजयामिनमः ॐऐंह्रींश्रींविमलांबाश्रीपादुकां
पूजयामिनमः ॐऐंह्रींश्रींअनयेंबाश्रीपादुकांपूज
यामिनमः ॐऐंह्रींश्रींवेदयेंबाश्रीपादुकांपूजयामि
नमः ॐऐंह्रींश्रींप्रवेदयेंबाश्रीपादुकांपूजयामिनमः
इतिद्वारस्यवामदक्षिणयोर्द्वेद्वे शाक्तीसंपूज्य मध्ये
ॐऐंह्रींश्रींप्रमर्दित्येंबाश्रीपादुकांपूजयामिनमः
इतिपूजयेत् तत्रवस्त्रेणद्वारमाछाय घंटावादनपू
र्वकं ह्रौं इतिमंत्रेणमंत्रितपंचगव्यार्घतोयाभ्याम
स्त्रायफडितिमंडपांतःप्रोक्ष्य तत्रमंडपेप्रदीपमाल्या

पूं

४९

49

दिभिः संपूज्य नैरृते ॐ ऐं ह्रीं श्रीं वास्तुपुरुषाय नमः
ॐ ऐं ह्रीं श्रीं वास्तवीश्वराय नमः ईशाने ॐ ऐं ह्रीं श्रीं कु
लनाथश्रीपादुकां पूजयामि नमः ॐ ऐं ह्रीं श्रीं रक्तवर्ण
द्वादशशक्तिसहितश्रीदीपनाथश्रीपादुकां पूजया
मि नमः इति दीपनाथं संपूज्य ॐ ऐं ह्रीं श्रीं अस्मिन्दे
वे दीपनाथ निर्विघ्नसिद्धिहेतवे श्रीविद्याक्रमपूजा
र्थमनुज्ञां दीयतां मयि इति दीपनाथाज्ञां प्राप्य ॐ ती
क्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम भैरवाय नम
स्तुभ्यमनुज्ञां दातुमर्हसि ॥ विंदुत्रिकोणहनेचस्रा

रेखान्तमंडितम् चतुर्हस्तपरीमाणेनवस्त्रखंकारयेत्ततः
तस्योपर्यासनेस्थाप्यनिर्भयःसर्वथाशुचिः निवेश्यतत्र
शुद्धान्तःकरणःपूजनंचरेत् इतिभैरवाज्ञाश्चादायस्त्रः
फट् इतिपूजावेदीगत्वा ॐरलवरहूंफट्स्वाहा इतिमं
त्रेणभूमिंसंप्रोक्ष्यासनानिपश्याच्छिवे स्तडहुडकमासी
नस्थान्येषुकंबलेषुवा विहरेषुसमासीनःसाधयेत्ति
हिशुजमो सर्वाकृषणमासतोगर्भच्युतमाइर्टफ्ढुथः
हुडोपनयनहीनेचमस्तंवाहुडकोविदुः निहन्तहुडाकर
णाहीनोपनयनःश्रमात् योमस्तंपंचमेवर्षेतमेवको

पू॰ मलेविदुः काम्यार्थेकंवलंचैवश्रेष्ठंचरक्तकंवलं कृस्मा
प॰ जिनेकाम्यसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि कुशासनेमंत्रसि
द्धिर्नात्रकार्याविचारणा धरण्यांदुःखसंहद्धिर्दौर्भाग्यंदा
50 रुजासने वंशासनेदरिद्रःस्यात्पाषाणेव्याधिपीडितः
तृणासनेयशोहानिःपल्लवेचित्तविभ्रमः जपध्यानत
पोहानिःवस्त्रासनंनकारयेत् पंचाशत्कुशतोद्वलात
दर्थेविष्टरःस्मृतः कुशपत्रैश्चतैनैवविष्टरंकारयेद्बुधः
जीवन्यासंततःकृत्वातस्योपरिजपंचरेत् आसनशो
धनेकुयीयथा ओंअस्यश्रीआसनशोधनमंत्रस्य मे

कहहऋषिः मतलेछंदः हूर्मोदेवता श्रांबीजं ह्रींशक्तिः
क्रौंकीलकं श्रासनारोपणेविनियोगः इतिकृतांजलिः
स्मृत्वान्यसेत् ॐऐंह्रींश्रींमेकहहऋषयेनमः शिरसि
ॐऐंह्रींश्रींमतलेछंदसेनमः मुखे ॐऐंह्रींश्रींहूर्मोदेव
तायनमः हृदि ॐऐंह्रींश्रींश्रांबीजायनमः गुह्ये ॐऐंह्रीं
श्रींक्रौंकीलकायनमः नाभौ ॐऐंह्रींश्रींक्रौंशक्तयेन
मः पादयोः श्रासनारोपणेविनियोगः सर्वांगेषु इति
ऋष्यादिन्यासः अथकरन्यासः ह्रींश्रांक्रौंअंगुष्ठाभ्यांन
मः ह्रींश्रांक्रौंतर्जनीभ्यांस्वाहा ह्रींश्रांक्रौंमध्यमाभ्यांव

पृं ५१

52

षट् ह्रीं श्रीं क्लीं अनामिकाभ्यां हुं ह्रीं श्रीं क्लीं कनिष्ठिकाभ्यां
वौषट् ह्रीं श्रीं क्लीं अस्त्राय फट् इति करन्यासः अथ षडंग
न्यासः ह्रीं श्रीं क्लीं हृदयाय नमः ह्रीं श्रीं क्लीं शिरसे स्वाहा
ह्रीं श्रीं क्लीं शिखायै वौषट् ह्रीं श्रीं क्लीं कवचाय हुम् ह्रीं श्रीं
क्लीं नेत्रत्रयाय वौषट् ह्रीं श्रीं क्लीं अस्त्राय फट् अथ ध्यानं
ध्यायेत्कूर्मं महाविष्णुं सर्वाधारस्वरूपकं श्रीवत्सकौस्तु
भंयस्समायुक्तस्थितिकारकं दुष्टनिदारणपरं नील
र्णं चतुर्भुजं शंखचक्रगदापद्मकिरीटवनमालिका
हृष्टभूषाभिर्दिव्यं ध्यायेत्पीतांबरसमाहृतो द्राविणीश्रामि

नीशक्तिपुत्रं देवि विचिंतयेत् इति कृतांजलिं कृत्वा ॐ
ऐं ह्रीं श्रीं ॐ श्रीं पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना
धृता त्वं च धारय मां देवि पवित्रं चासनं कुरु इति पृथ्वी
प्रार्थ्य पूजास्थानं मूलेन वीक्ष्यास्त्रेण प्रोक्ष्यास्त्रेणैव कु
शैस्त्रिः संताड्य कवचेनाभ्युक्ष्य ॐ ऐं ह्रीं श्रीं श्रों ह्रीं क्रों व्या
घ्रचर्मसिंहासनाय नमः ॐ ऐं ह्रीं श्रीं शान्ताभिषेके
शान्ताभिषेके हूं फट् स्वाहा ॐ पुष्पकेतुराजार्हाय शता
य सम्यक् संभावय हूं ॐ ऐं ह्रीं श्रीं पुष्पे पुष्पे महापुष्पे
सुपुष्पे पुष्पसंभवे पुष्पचयावकीर्णे हूं फट् स्वाहा

पू॰
५२
52

इतिमंत्रेणपुष्पंसंशोध्य ततोगंधाक्षतपुष्पैःआसनंपूज
येत् ॐऐंह्रींश्रींमंडूकायनमः ॐऐंह्रींश्रींकालाग्निरुद्रा
यनमः ॐऐंह्रींश्रींमूलप्रकृत्यैनमः ॐऐंह्रींश्रींआधार
शक्त्यैनमः ॐऐंह्रींश्रींकूर्मायनमः ॐऐंह्रींश्रींअनंता
यनमः ॐऐंह्रींश्रींवराहायनमः ॐऐंह्रींश्रींपृथिव्यैन
मः ॐऐंह्रींश्रींइक्षुरससमुद्रायनमः ॐऐंह्रींश्रींमदिरा
समुद्रायनमः ॐऐंह्रींश्रींघृतसमुद्रायनमः ॐऐंह्रींश्रीं
दुग्धसमुद्रायनमः ॐऐंह्रींश्रींअंआंइंईं उंऊंऋंॠं लृंॡं
एंऐं ओंऔंअंअः कंखंगंघंङं चंछंजंझंञं टंठंडंढंणं तं

येदेंथेंनें पेंफेंबेंभेंमें येंरेंलेंवें शेंषेंसेंहेंलेंक्षें: नवरत्न

द्वीपाय नमः ... ।

डविराजितायनवरत्नमयद्वीपायनमः ॐऐंह्रींश्रींअं

आंइंईंउंऊंऋंॠंऌंॡंरत्नायनमः लंलंएंऐंओंऔंअंअः

वैडूर्यरत्नायनमः ॐऐंह्रींश्रींकंखंगंघंङंनीलरत्नाय

नमः चंछंजंझंञंविद्रुमरत्नायनमः टंठंडंढंणंमौ

क्तिकरत्नायनमः तंथंदंधंनंमरकतरत्नायनमः पं

फंबंभंमंवज्ररत्नायनमः यंरंलंवंगोमेधरत्नायन

मः ॐऐंह्रींश्रींशंषंसंहंलंक्षंः पद्मरागरत्नायनमः

ॐऐंह्रींश्रींस्वर्णपर्वतायनमः ॐऐंह्रींश्रींनंदनोद्याना

पू॰
५३
53

यनमः ॐ ऐं ह्रीं श्रीं कल्पहद्रेभ्योनमः ॐ ऐं ह्रीं श्रीं महा
पद्मवनायनमः ॐ ऐं ह्रीं श्रीं संतादिषट्कञ्जेभ्योनमः
ॐ ऐं ह्रीं श्रीं इंद्रियाश्वेभ्योनमः ॐ ऐं ह्रीं श्रीं इंद्रियार्थगजे
भ्योनमः ॐ विचित्ररत्नभूमिकायैनमः ॐ ऐं ह्रीं श्रीं विचि
त्रमणिमंडपायनमः ॐ ऐं ह्रीं श्रीं नवरत्नखचितरत्नम
यवेदिकायैनमः ॐ ऐं ह्रीं श्रीं रत्नसिंहासनायनमः ॐ ऐं
ह्रीं श्रीं सहस्रारपद्मायनमः ॐ ऐं ह्रीं श्रीं प्रकृतिमयप
त्रेभ्योनमः ॐ ऐं ह्रीं श्रीं विकृतिमयकेसरेभ्योनमः ॐ ऐं
ह्रीं श्रीं पञ्चबीजभूषितकर्णिकायैनमः ॐ ऐं ह्रीं श्रीं धर्मा

यनमः ओंऐंह्रींश्रींज्ञानायनमः ओंऐंह्रींश्रींवैराग्यायन
मः ओंऐंह्रींश्रींऐश्वर्यायनमः ओंऐंह्रींश्रींअधर्मायनमः
ओंऐंह्रींश्रींअज्ञानायनमः ओंऐंह्रींश्रींअवैराग्यायनमः
ओंऐंह्रींश्रींअनैश्वर्यायनमः ओंऐंह्रींश्रींसत्त्वायनमः
ओंऐंह्रींश्रींरंरजसेनमः ओंऐंह्रींश्रींतंतमसेनमः ओंऐंह्रीं
श्रींआंआत्मनेनमः ओंऐंह्रींश्रींअंअन्तरात्मनेनमः ओंऐं
ह्रींश्रींपंपरमात्मनेनमः ओंऐंह्रींश्रींज्ञानात्मनेनमः ओं
ऐंह्रींश्रींमहिषासनायनमः ओंऐंह्रींश्रींयोगपीठासना
यनमः इत्यासनंसंपूज्य ततःपद्मायामासनेशाङ्कमुखोद

पू॰
५४

मुखोपविश्य पश्चिमुखः प्राङ्मुखस्तिष्ठेन्ममुद्गश्चोत्तरामुखः
वश्यार्थे पश्चिमाशास्थो मारणे दक्षिणामुखः उच्चाटनेवा
ग्रमुखो स्तंभने नैर्ऋते स्थितः स्वपुरतः श्रीचक्रे पीठोपरि
संस्थाप्य ततः पुष्पाञ्जलिं गृहीत्वा मूलमुच्चार्य समस्त
प्रगाकटगुप्ततरसंप्रदायकुलकौलनिगर्भरहस्यपरा
पररहस्यपरा पररहस्यातिरहस्यसिद्धयोगिनीचक्रेभ्यो नमः इति मंत्रे
ण पुष्पाञ्जलिं श्रीचक्रोपरि निक्षिपेत् इति संपूज्य तत्र
यथोक्तमासनमास्तीर्यासनेण प्रोक्ष्य ॐ ह्रीं आधारशक्तिक
मलासनाय नमः इति संपूज्य आसनाग्रे ये ॐ ऐं ह्रीं श्रीं

गंगणपतये नमः नैरृते ॐ ऐं ह्रीं श्रीं दुं दुर्गायै नमः वाय
व्ये ॐ ऐं ह्रीं श्रीं सं सरस्वत्यै नमः ईशाने ॐ ऐं ह्रीं श्रीं क्षं क्षेत्र
पालाय नमः इति संपूज्य तत्र पद्मासनेनोपविश्य सावि
त्र्यां ध्यायेन्मंत्रं स्वीकुर्यात् तद्विधिरग्रे वक्ष्यामि रक्तांबर
स्रगाभरणभूषितस्तांबूलपूरितमुखः कर्पूरमृगनाभि
सुवासितांगः हारकेयूरांकितशरीरः शिवोहमिति भाव
यन् गुरूपदिष्टविधिना श्रीचक्रं पुरतः संस्थाप्य यावज्जी श्रीचक्रनिर्माल्यप्रकारो यथा
वेत्सुवर्णे स्यात्सप्तविंशतिः रौप्ये नाम्रे द्वादश वर्षाणि
जैषाणमामकं स्फटिके मणिमुक्ताप्रवालाद्यं गंडकीप्रस्तरो

पृ॰
५५ 55

ध्रुवम् प्रशान्तं सर्वकामार्थं सर्वकालं च स्फाटिकम् समरे
त्विष्टेणभाण्डदीक्षितशिल्पिनिर्मितम् एतेषामन्यतमं तत्का
र्यं वित्तानुसारतः मूलेन पुष्पांजलिं क्षिप्त्वा स्ववामाग्रे भूतेभ्यो
नमः अथ भूतबलिं दत्वा ॐ ऐं ह्रीं श्रीं भूतानि यानीह वसंति
भूतले बलिं गृहीत्वा विधिवत्प्रयुक्तम् अन्यत्र वासं परिक
ल्पयंतु क्षमंतु चान्यत्र नमोस्तु तेभ्यः इति भूतबलिं विसृज्य
उत्तरे पक्षिरूपं भक्षयंतं भक्तानां वैरिसंचयम् शालभैरो द्रु
पाख्यं ध्यायेदुत्तरादिग्गतमिति ध्यात्वा ॐ ऐं ह्रीं श्रीं ॐ नमो भ
गवते शालभशाल्वाय पक्षिराजाय मम शत्रून्नाशय नाश

यह्रौंचचहुंफट्स्वाहा श्रीशालभंजकश्रीपादुकांपूजयामिन
मः तद्यथा ॐऐंह्रींश्रींॐनमोभगवतिशालभंजिकेशत्रुवि
दारिणिममशत्रून्नाशयनाशयहुंफट्स्वाहा श्रीशालभीदेवी
श्रीपादुकांपूजयामिनमः कल्पान्तार्कप्रकाशंत्रिभुवनम
खिलं तेजसापूरयंतंरक्ताक्षंपिंगकेशंरिपुकुलभयदंभी
मदंष्ट्राट्टहासम् शंखंचक्रंगदांचपृथुतरमुसलेचापपा
शांकुशान्वैबिभ्राणंदोर्भिराद्यंमनसिमुररिपुंभावयेच्चक्ररू
पम् इतिध्यात्वा ॐऐंह्रींश्रींॐसहस्रारहुंफट्श्रीसुदर्शना
स्त्रायनमः इतिपूर्वदिशि सजलघनसमानंभीमदंष्ट्रंत्रिने

पृ॰ ५८

56

त्रेभुजगाधरमघोरं रक्तवस्त्रांगरागम् परशुडमरुखड्गान्खेटकेबाणपाशौ त्रिशिखनरकपालेबिभ्रतंभावयामि इतिध्यात्वा ॐ ह्रीं स्फुरस्फुर प्रस्फुर प्रस्फुर घोरघोरतरतनुरूप चट चट प्रचट प्रचट कहकह वमवम बंधबंध घातय घातय हुंफट् अघोररुद्रास्त्रायनमः इतिदक्षिणे ॐ अतिक्रुद्धशालिविकिरणविघ्नमयंमेसमुपस्थितम् सौवर्णांबुजमध्यगांत्रिनयनांसौदामिनीसन्निभां शंखंचक्रवराभयानिदधतीमिंदोःकलांबिभ्रतीम् ग्रैवेयांगदहारकुंडलधरामाखंडलाद्यैःस्तुतां ध्याये विंध्यनिवासिनींशशिमुखींपार्श्वस्थपंचाननामिति

ॐ ऐं ह्रीं श्रीं उत्तिष्ठपुरुष किं स्वपिषि भयं मे समुपस्थितम् -

वनदुर्गांध्यात्वा यदिशक्यमशक्यंवातन्मेभगवतिशम
यस्वाहा श्रीं दुं वनदुर्गायैनमः इतिपश्चिमे वहिस्थाना
न्संपूज्य स्वदक्षेगंधादिपूजोपकरणानिधाय स्ववामेजल
द्रव्यादिकंसंस्थाप्य ह्रांह्रींह्रूंह्रैंह्रौंह्रः फडितिस्मरन्नाराचमु
द्रया दिव्यदृष्ट्याचपुष्पादिकंविलोक्य वामभागस्थंजल
पूर्णकुंभं आमितिवामहस्तेनस्पृष्ट्वा हौंइतिदक्षकराग्रेण
तत्स्थंजलेचस्पृष्ट्वा रमितिदीपाग्निंवाचस्पृष्ट्वा करौप्रक्षा
ल्य वामे ॐऐंह्रींश्रींऐंगुरुपादुकाभ्योनमः दक्षिणे ॐऐं
ह्रींश्रींगंगणपतयेनमः अग्रे ॐऐंह्रींश्रींह्रींपरदेवतायै

पृं
५७
57

नमः इति प्रणम्य मूर्ध्नि संवहमुद्रां विधाय ॐ ऐं ह्रीं श्रीं ह्स्रौं
सहक्षमलवरय[illegible] सहक्षमलवयऊं सहक्षमलवयरीं
ह्स्रौं श्रीपरपावकसर्वाराध्यसर्वमूर्धपुरन्ताणसर्वेगुरु
स्वयंगुरु श्रीगुरुनाथरहसहक्षमलवयऊं ह्स्रौं सहक्ष
मलवयरीं सहक्षमलवयऊं सहक्षमलवयरीं श्रीशंभु
गुरु स्हौं सहक्षमलवयऊं श्रीअमुकानंदनाथ श्रीपादु कांश्रीअमुका
याश्रीपादु कां पूजयामि नमः इति शिरसि श्रीगुरुपादुकां विन्यस्य
पुनरनयैव विधयागंयादिना स्वशिरसि श्रीगुरुं संपूज्य
गंयादिपंचमुद्राः प्रदर्श्य ॐ ऐं ह्रीं श्रीं ॐ नमोस्तु गुरवे न

स्मायिहृदेवस्वरूपिणी यस्यवागमृतेनेहंतिविघंसंसारसं
तके इतिनमस्कारमुद्रयाप्रणम्य ॐऐंह्रींश्रींक्लेंक्रोंसौः
इतिस्वगंधद्रव्यमर्दनेनसुरभीकृत्य स्वगंधपुष्पंदत्तक
रेणमर्दयित्वावामकरेणाँघ्रायनिर्मुच्य ॐऐंह्रींश्रींतेभ
वैविलयंयान्तयेमांहिंसन्तिहिंसकाः स्वस्वरोगभयक्ले
शाःपतन्तुरिपुमस्तके इतिमंत्रंपठित्वा नाराचमुद्रयात
त्पुष्पमुत्तरस्यांदिशिदूरेक्षिपेत् ततःपुनःकरशुद्धिंक्रिय
याकरावस्त्रोत्यमर्दनेनसंशोध्य मध्यमयोः ॐऐंह्रीं
श्रींक्लेंनमः ॐऐंह्रींश्रींक्लोंनमः अनामयोः ॐऐंह्रींश्रीं

पू॰
५८
58

सौः कनिष्ठिकयोः ॐऐंह्रींश्रींऐंनमःअंगुष्ठयोः ॐऐंह्रीं
श्रींक्लींनमः तर्जन्योः ॐऐंह्रींश्रींसौःनमःकरतलकरपृ
ष्ठयोः इतिविन्यस्य ॐऐंह्रींश्रींऐंक्लींसौःनमःत्रिपुरसु
न्दरिमांरक्षरक्ष इतिमूर्धादिपादांतंत्रिर्व्यापकंविन्यस्य
पुनरप्याचार्य ऊर्ध्वाधस्तालत्रयं तर्जन्यंगुष्ठघातेनदशदि
ग्बंधनंविधायत्रिशूलाकारयोर्व्यस्तयोःकरयोःस्वमूर्धा
नेपरितस्त्रिर्भ्रामणेनवह्निप्राकारत्रयंचकृत्वा प्राणा
यामत्रयंचविधाय संविन्न्यासापनेअर्थान् संहितयोर्या
संविदामवयोर्मध्येसंविदेवगरीयसी भक्तिनामभवना

शोधयन्निर्गंधावोपद्रूपिणी साधनः संविदीशानिचत्वर्थी
कथिताशिवे ब्राह्मणीश्वेतपुष्पा च क्षत्रिया रक्तपुष्पिका
पीतपुष्पा च वैश्या वै शूद्रा च कृष्णपुष्पिका आनंदेन वि
नाभेश्वेशान चत्वार्यपि निदेवताः तत्र विंदुस्त्रिकोणं हृते च वत्त
रस्त्रं कारयेत्ततः तस्योपरि ओं ह्रीं आधारशक्तये नमः
अनेनासनं संपूज्य संविदं स्थापयेत्सुधीः॥ तस्योपरि करं
दत्वा मंत्रयेत्संविदं शिवे न्यासादिकं ततः ऊर्ध्वान्नादिग्वंध
नपुरस्सरम् अस्य श्रीविजयामंत्रस्य शिवऋषिः त्रिष्टु
प्छंदः श्रीविजयादेवता संवित्शोधने विनियोगः

पू॰ ५९

59

इतिकृतांजलिःस्मृत्वान्यसेत् शिवऋषयेनमः शिरसि
त्रिष्टुप्छंदसेनमो मुखे श्रीविजयादेवतायैनमो हृदि संवित्
शोधनेविनियोगः अंगानिनसंति अथध्यानं पाशांकुशौ
चापवरंचबाणंदोर्भिर्दधानांसकलार्थदात्रीम् दिव्यांब
रांभूषणभूषितांचपद्मासनांश्रीविजयांनमामि इति
ध्यात्वाशोधनंकुर्यात् संविदेब्रह्मसंभूतेब्रह्मपुत्रिसदा
नघे ब्राह्मणानांचतृप्त्यर्थंपवित्राभवसर्वदा ॐऐंह्रींश्रीं
ॐब्राह्मण्यैनमःस्वाहा इतिमंत्रेणब्राह्मींसंशोध्य ॐसि
द्धमूलकृतयेदेविहीनबोधप्रबोधिनिराजप्रजावशंक

रिपुशत्रुपक्षनिसूदिनि ॐ ऐं ह्रीं श्रीं ऐं क्षत्रियायै नमः स्वाहा
इति मंत्रेण क्षत्रियां संशोध्य ॐ अज्ञातानेथनदीमाग्रेज्ञाना
ग्निब्रह्मरूपिणि आनंदस्याङ्गतिं प्रीतिं सम्यग्ज्ञाने प्रयच्छमे
ह्रीं वैश्यायै नमः स्वाहा इति मंत्रेण वैश्यां संशोध्य ॐ नम
स्वामिन्नमस्वामि योगमार्गप्रदर्शिनि त्रैलोक्यविजये मा
नः समाधिफलदा भव क्लीं शूद्रायै नमः स्वाहा इति मंत्रेण
शूद्रां संशोध्य अथ वैकेन मंत्रेण सर्वास्ताः शोधयेत्सुधीः
इत्यभिमंत्र्य ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतमा
कर्षय आकर्षय सिद्धिं देहि श्रीमहात्रिपुरसुंदरीपदं मेव

पू॰
५८
60

शमानय स्वाहा इति तदुपरि समयां मूलेन च जप्त्वा आनंदे
श्वरभैरवं भैरवीं च समयां जपेत् धेनुमुद्रयामृतीकृत्य यो
निमुद्रां दर्शयेत् ह्रां मित्यवगुंठ्य फडिति संरक्ष्य मूलं आगच्छ आग
च्छ संतिष्ठ संतिष्ठ सन्निधेहि सन्निधेहि सन्निरुद्ध्यस्व सन्नि
रुद्ध्यस्व संमुखी भव संमुखी भव इत्यावाहनादिमुद्राः संद
र्शयेत् तालत्रयेण दिग्बंधं बाणवामपार्ष्णिघातत्रयेण च त्रि
विधविघ्नानुत्सार्य छोटिकाभिः फडिति दशदिग्बंधनं वि
धाय वामहस्तकृततत्त्वमुद्रया आदौ भ्रूमध्ये आनंदेश्वरं
भैरवीं च त्रिधा संतर्प्य ततो स्वशिरसि स्वगुरुं त्रिवारं वाम

नर्थं स्वल्पदिपरदेवतांचसंतर्प्य संवित्स्वीकारंकुर्वीत

यथा ॐ ऐंवदवदवाग्वादिनिममजिह्वाग्रेस्थिरीभवसर्व कामेश्वरंवातदभावेस्वीजपीत्

सत्ववशंकरिस्वाहा इत्यनेनमुखेजुहुयात् ततआनंद

मयोभूत्वा भूतशुद्धिंकुर्यात्यथा ॐअस्यश्रीभूतशुद्धिम

हामंत्रस्य ब्रह्मऋषिः देवीगायत्रीछंदः आकाशवा

य्वग्निजलभूमयोदेवता ह्रंयंरंलंवंबीजानि ममपांचभौ

तिकशरीरशोधनार्थेजपेविनियोगः अथऋष्यादिन्या

सः ब्रह्मऋषयेनमः शिरसि देवीगायत्रीछंदसेन

मो मुखे आकाशवाय्वग्निजलभूमयोदेवतायैनमो हृ

अनतुसत्त्वप्रभेद

पू॰ दि हं यं रं लं वं बीजानि मम पांचभौतिके नेमो ग्रहे शरी
८१ रशोधनार्थे जपे विनियोगः इति ऋष्यादिन्यासः अथ क
रन्यासः लं रं यं वं हं अनतुसत्त्वप्रभेदात्मने अं अंगुष्ठाभ्यां
-61 नमः लं रं यं वं हं त्मने ईं तर्जनीभ्यां स्वाहा लं रं यं वं हं अन
तुसत्त्वप्रभेदात्मने ऊं मध्यमाभ्यां वषट् लं रं यं वं हं अनतु
सत्त्वप्रभेदात्मने ऐं अनामिकाभ्यां हुम् लं रं यं वं हं अनतु
सत्त्वप्रभेदात्मने औं करतलकरपृष्ठाभ्यां वौषट् लं रं यं वं हं
अनतुसत्त्वप्रभेदात्मने ऐं अस्त्राय फट् इति करन्यासः अ
थ हृदयादिन्यासः अनतुसत्त्वाप्रभेदात्मने हृदयाय न

मः अव्यक्तप्रबोधात्मने शिरसे स्वाहा अचिन्त्यशक्त्यात्मने
शिखायै वषट् अनन्तविद्यात्मने कवचाय हुम् अमेयक
वचात्मने नेत्रत्रयाय वौषट् अलभ्यगम्यात्मने अस्त्राय फट्
इति हृदयादिन्यासः भूर्भुवःस्वरोमिति दिग्बन्धनम् ॥ अथ ध्या
नम् पांचभौतिकसंभूते कलापंचकसंयुते ब्रह्मादिपंच
संयुक्ते पंचीकरणवर्गकम् पंचपंचात्मकमिदं शिवरूपे
तनुं भजे इति ध्याने ॥ पादादिजानुपर्यन्ते पृथ्वीस्थाने चतुर
स्रे वज्रलाञ्छिते पीतवर्णे ब्रह्मदैवते निवृत्तिकलाधिष्ठिते
लेबीजयुते ध्यात्वा जान्वादिनाभिपर्यन्ते अपांस्थाने शुक्लव

पांचभौतिकं पृथिवीजलतेजवायुआकाश ॥ कलापंचकं निवृत्तिकला, प्रतिष्ठाकला, विद्याकला, शान्ताकला, शान्त्यतीताकला ॥
ब्रह्मादिपंचकं, ईशानब्रह्म, तत्पुरुष, वामदेव, अघोर, सद्योजात ॥ पंचीकरणं द्विधाविधायचैकैकं चतुर्धा प्रथमं पुनः, स्वस्वेतरद्वितीयांश
योजनात्पंचपंचते ॥॥

पृ. ८२

62

णीमर्धचंद्राकारं शृंगद्वयेपि पद्मलांछितं विष्णुदैवतं प्रति
ष्ठाकलाधिष्ठितं वंबीजयुक्तं ध्यात्वा नाभ्यादिकंठपर्यंतं व
ह्निमंडलं स्वस्तिकोपेतं त्रिकोणाकारं रक्तवर्णं रुद्रदैवतं
विद्याकलाधिष्ठितं रंबीजयुतं ध्यात्वा कंठादिभ्रूमध्यपर्यं
तं वायुमंडलं षट्कोणाकारं षड्बिंदुलांछितं हंसोपेतं
कृष्णवर्णमीश्वरदैवतं शांतिकलाधिष्ठितं यंबीजयुक्तं ध्या
त्वा भ्रूमध्यादिब्रह्मरंध्रांतं आकाशस्थाने वृत्ताकारं ध्वज
लांछितं धूम्रवर्णं सदाशिवदैवतं शांत्यतीताकलाधिष्ठि
तं हंबीजयुतं ध्यात्वा तत्र पंचभूतमये देहे धर्मकंदसमुद्भू

नेज्ञाननालकमैश्वर्याष्टदलोपेतं परवैराग्यकर्णिकं स्व
हृदयारविंदं ध्यात्वा तत्कर्णिकायां जीवात्मानमाराग्रमा
त्रंप्रदीपकलिकाभास्वरमनादिमन्त्रासंछन्नंपरंचिद्रूपंसं
चिंत्य प्रागुक्तरूपेणमूलाधारात्कुंडलिनीमुत्थाप्य सुषु
म्णावर्त्मनामूलाधाराद्यनाहतान्तस्थवर्णाधिदेवताग्रेस
मीहृदयकमलमानीय तयाकवलीकृतंजीवात्मानंध्या
यन् सुषुम्णावर्त्मनाविशुद्ध्यादिचक्रस्थवर्णाधिदेवताग्र
सेतीं ब्रह्मरंध्रंनीत्वा तत्रास्थितसहस्रदलकमलकर्णि
कामध्यवर्तिनिपरमात्मज्योतिषिसवर्णवर्णदेवताकं

पूं
६३
63

वकं जीवात्मानं हंस इति मंत्रेण संयोज्य कुंडलिनीस्व
स्थानमानीय तत्र संहारं कुर्यात् तत्र पृथिवीस्थाने पादें
द्रियगमनक्रियागंतव्यंगंधघ्राणपृथिवीब्रह्मनिवृत्ति
समानवायून्संस्मृत्य ॐ ऐं ह्रीं श्रीं ॐ ह्रां ब्रह्मणे पृथिव्यधि
पतये निवृत्तिकलात्मने हुं फट् स्वाहा इति मंत्रेण तान्कुं
डलिनीद्वारा अपां मध्ये संहरेत् ततोऽपां स्थाने हस्तदान
दातव्यरसरसनाजलविष्णुप्रतिष्ठादानान्संचिंत्य ॐ ह्रीं
विष्णवे जलाधिपतये प्रतिष्ठाकलात्मने हुं फट् स्वाहा
इति तान्सर्वान् कुंडलिनीद्वारा वह्निमध्ये संहरेत् ततो

वह्निस्थाने पायुविसर्गविसर्जनीयरूपचक्षुर्वह्निरुद्रवि
द्याख्यानात्संस्मरेत् ॥ ॐ ह्रूं रुद्रायतेजोऽधिपतये विद्याक
लात्मने हूं फट् स्वाहा ॥ इति तान्सर्वान्वायुमंडले संहरेत् । त
तो वायुस्थाने उपस्थानंदत्वग्विषयस्पर्शस्पृष्टव्यत्वक्वा
य्वीश्वरशान्त्यः पानात्संस्मरेत् ॥ ॐ ह्रैं ईश्वराय वाय्वधिपत
ये शान्तिकलात्मने हूं फट् स्वाहा ॥ इति तान्सर्वानाकाशस्था
ने संहरेत् ॥ ततश्चाकाशस्थाने वाग्वचनवक्तव्य शब्दश्रो
त्राकाशसदाशिवशान्त्यतीताप्राणात्संस्मरेत् ॥ ॐ ह्रौं सदा
शिवायाकाशाधिपतये शान्त्यतीताकलात्मने हूं फट् स्वा

पू: ८४

64

हा इतितान्सर्वान्कुंडलिन्यां संहृत्य तां बिंदुशक्तौ बिंदुश
क्तिं नादशक्तौ नादशक्तिं परमशक्तौ प्रणवेन संहृत्य
ॐ ह्रीं हूं फट् स्वाहा इति तां परमशक्तिं पूर्वोक्तपरमात्मनि
योज्य ॥ केवलशरीरे वामकुक्षौ पापपुरुषं विंतयेद्यथा ॥
ॐ वामकुक्षिस्थितं पापपुरुषं कज्जलप्रभं ब्रह्महत्याशि
रस्कं च स्वर्णस्तेयभुजद्वयं सुरापानहृदायुक्तं गुरुतल्पक
टिद्वयं तत्संसर्गिपदद्वंद्वमंगप्रत्यंगपातकं २ उपपात
करोमाणं रक्तश्मश्रुविलोचनं अधोमुखं कृष्णवर्णमंगु
ष्ठपरिमाणकम् समस्तासुरपत्नीनां वधेन कल्मषात्म

कम् खड्गचर्मधरं क्रुद्धं पापं ह्रदो विचिंतयेत् ३ इतिपाप
पुरुषं विचिंत्य वामनासारंध्रेण यं बीजेन सह वायुमा
पूर्य नाभिस्थषट्कोणाकारे वायुमंडले संयोज्य तत्रय
मितिवायुबीजं कृष्णवर्णं संचिंत्य कुंभकेन यमिति वायु
बीजमावर्तयेत्तदुत्थितेन महावायुना सपापपुरुषं स्व
शरीरस्थं संशोष्य वायुं दक्षिणनासया विरेच्य पुनर्दक्षि
णनासया रं बीजेन सह वायुमापूर्य मूलाधारे संयोज्य
तत्रस्थवह्निमंडले रमिति वह्निबीजं रक्तवर्णं विचिंत्य
कुंभकेन रमिति बीजमावर्तयेत्तदुत्थितेन महावह्निना स

पूः ६५

65

पापपुरुषं स्वशरीरस्थं संदह्य पापपुरुषभस्मना सहितं
वायुं वामनासया विरेच्य पुनर्वामनासया वं बीजेन सह
वायुमापूर्य ब्रह्मरंध्रे संयोज्य तत्रस्थ विश्वेद्रमंडले वमि
त्यमृतबीजं शुक्लवर्णं विचिंत्य कुंभकेन वं बीजमावर्त
येत् तत्रस्थामृतधारया स्वदेहं भस्मप्लुतं विभाव्य तेवायु
दक्षिणनासया विरेच्य पुनर्दक्षनासया लं बीजेन सह वा
युमापूर्य मूलाधारस्थ पार्थिवमंडले संयोज्य तत्र लमि
ति पृथ्वीबीजं पीतवर्णं संचिंत्य कुंभकेन लं बीजमाव
र्तयेत् तद्दृढतेन तेजसामृतप्लावितं भस्म घनीकृत्य ॥ ते

वायुं वामनासया विरेच्य पुनर्वामनासया मायाबीजेन
वायुमापूर्य मूलाधारस्थविंदुमध्ये मायाबीजं स्फुरद्बाला
र्कवर्णं संचिंत्य कुंभकेन मायाबीजमावर्तयेत्तेन करचर
णाद्यवयवसमेतं स्वदेहं निष्पन्नं विभाव्य तेन वायुं दक्षना
सया विरेचयेत् इति स्थूलशरीरं निष्पाद्य सूक्ष्मशरीरं नि
ष्पादयेत् तत्र पूर्वोक्तसहस्रारकमलस्थपरमात्मनः स
काशात्सकलजगत्सिसृक्षाविजृंभितपरब्रह्मेच्छारूपिणीं
परशक्तिं ॐ ह्रीं नमः इति मंत्रेण शिरः स्वस्थानमानीय ततो
नादशक्तिं ततो विंदुशक्तिं प्रणवेन सृष्ट्वा विंदुशक्तेः स

वृमिश्र मिसलौ

पृ. ९९

66

काशात्सकलजगत्सृष्टिहेतुभूतां कुंडलिनीं प्रणवेन निः
सार्य ततः ॐ ह्रौं सदाशिवायाकाशाधिपतये शांत्यतीता
कलात्मने नमः इति प्राणं शांत्यतीतां सदाशिवाकाशश्रो
त्रशब्दवक्त्रव्यवचनवाक् आकाशस्थाने स्थापयेत् ततः
आकाशमंडलात् ॐ ह्रैं ईश्वराय वाय्वधिपतये शांतिक
लात्मने नमः इत्यपानं शांतीश्वरवायुत्वकस्पर्शहस्त
व्यानहृषयानेदोपस्थान्वायुस्थाने स्थापयेत् ततः ॐ ह्रुं
रुद्राय तेजोधिपतये विद्याकलात्मने नमः इति व्यानं वि
द्यारुद्रतेजश्चक्षूरूपविसर्जनीयविसर्गपायुनग्निस्थाने

स्थापयेत् ततः ॐ ह्रीं विस्नवे जलाधिपतये प्रतिष्ठाक
लात्मने नमः इति उदानप्रतिष्ठा विस्नजलरसनारसदा
नव्यदानहस्तानुपोस्थाने स्थापयेत् ततः ॐ ह्रां ब्रह्मणे
पृथिव्याधिपतये निवृत्तिकलात्मने नमः इति समानानि
वृत्ति ब्रह्मपृथिवीघ्राणगंधगंतव्यगमनपादान् पृथि
वीस्थाने स्थापयेत् ततः प्रणवेन कुंडलिनीं स्वस्थाने स्था
पयित्वा नादशक्तिबिंदुशक्तिपरमशक्तीनां प्रणवेन
स्वदेहे व्याप्तिं विभाव्य सोहमिति मंत्रेण ब्रह्मरंध्रस्य पर
मात्मनः सकाशात्कुंडलिनीजीवात्मानेव संपृतवर्णा

वर्णाधिदेवतासहितमातृकादिचक्रेषु तत्तद्वर्णाधिदे
वताःस्थापयन् हृदयकमलमानीय हृदयकमलेजी
वात्मानंस्थापयित्वा कुंडलिनीसुषुम्णामार्गेणमणिपू
रकादिचक्रेषु तत्तद्वर्णाधिदेवताःस्थापयन्मूलाधा
रंनीत्वा तत्रस्थापयेत् ततःस्वशरीरंनिरस्तसकलकल्म
षंदेवताराधनयोग्यंविभाव्य प्राणप्रतिष्ठांकुर्यात् इति
भूतशुद्धिविधिः॥ अथप्राणप्रतिष्ठा ॐअस्यश्रीप्राणप्रति
ष्ठामंत्रस्य श्रीब्रह्मविष्णुशिवाऋषयः ऋग्यजुःसामा
निछंदांसि पराप्राणशक्तिर्देवता आंबीजं ह्रींशक्तिः

क्रौंकीलकं ममश्रीप्राणप्रतिष्ठार्थेविनियोगः इतिकृ
तांजलिःस्मृत्वान्यसेत् श्रीब्रह्मविष्णुशिवऋषिभ्योनमः
शिरसि ऋग्यजुःसामछंदोभ्योनमः मुखे पराप्राणश
क्तिदेवतायैनमः हृदये आंबीजायनमो गुह्ये ह्रींशक्त
